CC-0. Digitized by eGangotri and MIDF- Delhi

हैमवती

महेन्द्रसंस्कृतविश्वविद्यालयः
बेलझुन्डी, दाङ नेपाल

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हैमवती

महेन्द्रसंस्कृतविश्वविद्यालयानुसन्धान पत्रिका
(षाण्मासिकी)

२०४५ जेष्ठ मासे | प्रथम वर्षे | प्रथमोऽङ्कः

सम्पादकमण्डलम्

प्राचार्य डा. वीरदेव विष्ट — प्रधान सम्पादकः

प्रा. डा. श्री हरिप्रसाद आचार्य — सम्पादकः
सह. प्रा. श्री रामेश्वर शर्मा — ''
उप प्रा. श्री लेखनाथ आचार्य — ''
सहायक प्रा. श्री भागवत प्रसाद शर्मा — ''
सहायक प्रशासकः श्रीहरिहर शर्मा अधिकारी कार्यकारी सम्पादकः

प्रकाशक

महेन्द्रसंस्कृतविश्वविद्यालयः
शिक्षाध्यक्षस्यकार्यालयः
बेलझुन्डी दाङ, नेपालः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हैमवत्या – नियमाः

(१) हैमवती महेन्द्रसंस्कृतविश्वविद्यालयः सञ्चालिता षाण्मासिकि अनुसन्धानात्मक (जर्नल) पत्रिका ।

(२) अस्यां पत्रिकायां संस्कृतभाषयामाङ्गलभाषायां च लेखा प्रकाशयिष्यन्ते ।

(३) हैमवत्यां प्रकाशितानां लेखानामुत्तरदायित्वं रचयितुरेव भविष्यति ।

(४) हैमवत्यां प्रकाशनाय प्रहितैर्लेखैरस्या उद्देश्यानुकुलै पत्राणामेकस्मिन्नेवपृष्ठे लिखितैः स्फुटलिपिभिश्च भाव्यम् ।

(५) अत्र अप्रकाशितानां लेखानां प्रत्यावर्तनमिच्छद्भिः स्वयमेव पत्रालयव्ययभारो वोढव्यः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषयसूची

लेखाः	लेखकाः	पृष्ठाङ्काः
१– जातेरस्त्रीविषयादयोपधादित्यादौ व्याकरणे कीदृशं जातित्वम् –	श्री विष्णुप्रसाद देवकोटा	१
२– साहित्यालङ्कारसरणौ भामहालङ्कारस्य प्रस्थानम् —	श्री रोहिणिवल्लभ शर्मा	६
६– शाङ्करवेदान्ते महावाक्यमीमांसा –	श्री गोपालनिधि तिवारी	११
४– देवीतत्त्वम् —	श्री विष्णुप्रसाद न्यौपाने	१७
५– द्वैताद्वैतान्यभेदः —	श्री दामोदर शर्मा	२८
६– महाकविः सुकृतिस्तत्कृतिमितयश्च–	श्री भागवतप्रसाद शर्मा	३४
७– मन्वादिस्मृतिविषये संक्षिप्ता आलोचना —	श्री छविलाल पोखरेल	४४

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्पादकीयम्

महानयं प्रमोदस्य विषयः यत् सर्वप्रथमं विदुषां समक्षे महेन्द्रसंस्कृत-विश्वविद्यालयात् प्रकाशिता ' अनुसन्धानीय विषय विशेष संवद्धा षाण्मासिकी हैमवती नाम्नी संस्कृत पत्रिका समर्प्यमाणाऽस्ति , विदुषां विदितमेव सर्वविद्या मूलमध्यात्म विद्या भगवत्योमया देवराजाय महेन्द्राय हिमालयाञ्चल एवाऽऽदौ समुद्बोधिता, दुःखवहुलानां जीवानां स्थेयसे श्रेयसे कथ्यमानाया यस्या एव चतस्रोविद्या आन्वीक्षिकी त्रयीवार्ताऽभिधाना समजनिषत , साक्षात परम्परया वाऽध्यात्मविद्या विषयं श्रेयो लक्ष्यीकृत्यव यासांमध्ययनाध्यापन-ज्ञानाऽऽचरण-प्रचारणान्यपि, वैदिक कालादारभ्य , हिमालयप्रदेशादेव विश्वविसृमराण्यभूवन् यत्प्रसङ्गे समुल्लसत्सर्वोच्च हिमालय चूडामणौ नेपाले, सकल ज्ञानविज्ञानविद्यापतेः शङ्करस्य पशुपतेर्भगवतः शुभाशीर्वादः पुराकालादद्य यावत् यथा समय साधन शक्ति, समाराधिता । संस्कृत वाङ्मय विद्या , नेपाल नरपालं स्वर्गीयं श्री५महेन्द्रं स्वभक्तंस्मरन्ती ननु तन्मुखात् नेपाले ज्ञान बिज्ञान समन्वय पूर्णं संस्कृत विश्वविद्यालय स्थापन सिद्धान्तं प्राचीचरन् । यस्य कार्यान्वयनाय पितृभक्ताः श्री५वीरेन्द्रवीरविक्रमशाह देवाः पितृपादानां श्री५महेन्द्रवीरविक्रमशाह देवानां पुण्यस्मृतौ महेन्द्र संस्कृत विश्वविद्यालयं नेपाले दाङ्गे गतवत्सरत एव संस्थापितवन्तःस्वीयैरमूल्यैः सुवर्ण निर्देशनैः सहाऽप्यस्य ज्ञान विज्ञान समन्वय सिद्धान्तंच सामान्यतः समुदघोषयन् , अतः संस्कृत-विश्व-विद्यालयस्य विदुषां शिरसि महान् भार आपतितो दृश्यते यतोऽत्र विशेषतो ज्ञान विज्ञान समन्वय नीतिः कीदृशी स्यान्महेन्द्रसंस्कृतविश्वविद्यालयस्येत्यत्रविभिन्न शास्त्रीय-विषयेषु चाऽनुसन्धान पूर्णान् लेखान् विद्वद्वरेभ्यो वयंवाञ्छामः। इदानीं प्रकाशिता लेखा अपि अनुसन्धानोन्मुखा इति विचार्याऽस्माभिः प्रकाशिताः सन्तिः, अग्रे इतो ऽप्यधिकं प्रयत्य विद्वद्भिरनुसन्धान पूर्णा लेखाः प्रेषयिस्यन्ते, इत्यत्र वयं वाढं विश्वस्तास्मः

किंच येषां सन्धान-भूमिका द्रढीयसी भवति तेषामेवानुसन्धानं सफलं भवति, सन्धानकथामात्रमप्यनुसन्धाने नशोभते, इत्यपि विदुषां नाऽविदितमेव ।

अन्तेऽनुसंन्धान लेख प्रेषकेभ्योऽस्माकं परमसहयोगिभ्यो गुरुवरेभ्य :, सुमुद्रण सहयोगिभ्यः कर्मचारिभ्यश्च साधुवादान् प्रयच्छन्तः पुनर्हैमवत्या अङ्कान्तर प्रकाशनायापि सर्वेषां विशेष सहयोगमाशास्महे ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जातेरस्त्री विषयादयोपधादित्यादौ, व्याकरणेकीदृशं जातित्वम्।

विष्णुप्रसाद शर्मा देवकोटा
उप प्रा. जनताविद्यापीठम्

षड्विधेषु सूत्रेषु सूत्रमिदं विधिसूत्रम्, ङीष्विधानात्। विधिसूत्रत्वञ्च साक्षाल्लक्ष्मसंस्कारकसाधुत्वप्रकारक बोधजनकत्वम्। सूत्रञ्चेदं त्रिपदम् - जातेः अस्त्रीविषयात्, अयोपधात् इति। अर्थो हि जाति र्गुणः क्रियाद्रव्यञ्चेति अर्थे जातौ ङीषादिकार्यस्यासम्भवात् स्ववाचकशब्दो जात्या लक्ष्यते, तात्पर्यानुपपत्तेः "लक्षणाशक्यसम्वन्धस्तात्पर्यानुपत्तितः" इत्युक्तेः। नाप्यत्र जातिशब्दस्य स्वरूपं गृह्यते, अस्त्रीविषयादित्यस्य अयोपधादित्यस्य च वैयर्थ्यापत्तेः। अतोऽत्र जातिशब्दो जातिवाचकशब्दलक्षकः। अस्त्रीविषयादित्यत्र विषयशब्दोऽनन्यभावार्थः यत्त च स्त्रियां नियतं तस्मादित्यर्थः। उपधात्वञ्च वर्णविशिष्टो वर्णः वैशिष्ट्यञ्च स्वाव्यवहितपूर्वत्वं स्वनिष्ठचरमावयवर्तिनरूपक समुदायघटकत्वैतदुभयसम्वन्धेन। अत्र स्त्रियामित्यधिक्रियते। एवञ्चायं सूत्रार्थः जातिवाचि यत्त च स्त्रियां नियतमयोपधं ततः स्त्रियां ङीष्स्यादिति। मृगी हंसीत्याद्युदाहरणम्।

द्विविधा हि जातिर्भवति। एका नियतव्यञ्जकव्यङ्ग्या गोत्वमृगत्वादिः। अपरा ब्राह्मणाद् ब्राह्मण्यामुत्पन्नोऽयमित्याद्युपदेशगम्या ब्राह्मणत्वक्षत्रियत्वादिः। तदुक्तं प्रकृत सूत्रभाष्ये–

आकृतिग्रहणा जातिः लिङ्गानाञ्च न सर्वभाक्।
सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥ इति।

आकृतिग्रहणा जातिः। लिङ्गानां न सर्वभाक् सकृदाख्यातनिर्ग्राह्या च जातिरित्यर्थः। गोत्रं च चरणैः सह इति तु न जातिलक्षणम्, किन्तु अतिदेशः। गोत्रपदेन च लौकिकं गोत्रं गृह्यते(२)। एवञ्च सूत्रे अन्यतरत्त्वेन जातिः संगृहीता।

१– तत्वबोधिन्याम्। २ पुत्रमात्तम्, न तु अपत्यं पौत्रप्रभृतिगोत्रमितिरूपम् शास्त्रीयमित्यर्थः। अपत्याधिकरणादन्यत्र लौकिकस्यैव ग्रहणात्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्वबोधिनीकारस्तु, गोत्रं च चरणैः सह'' इत्यपि जातिलक्षणमाह – तदुक्तम् - उक्त लक्षणद्वयानाक्रान्तत्वात्तृतीयं लक्षणमाह - गोत्रञ्चेत्यादि । नाडायनं बा - ह्वृचमिदमिति नपुंसकप्रयोगदर्शनात् सर्वलिङ्गौ गोत्रचरणौ, अतः पृथक लक्षणं कृतम्। तेनात्र लिङ्गानां च नसर्वभाक् इति द्वितीय लक्षणेन गतार्थता नशङ्क्या इति । परन्वेतत् भ्रममात्रम् तत्वबोधिनीकृताम् शेखरव्याख्यायां वरवर्णिन्यादौ- ''जातिवाचकतात्रयुक्त शास्त्रीय कार्य प्रवृत्तये आरोपितजातिमत्वं व्याचष्टे -गोत्रमिति उक्तेः । एवञ्च चरणैः सह गोत्रप्रत्ययान्ताः शब्दाः आरोपितजातित्व वाचका इति औपगवी कठी इत्यादौ ङीष् सिद्धं भवतीति ।

आकृतिग्रहणा इत्यत्र आकृतिग्रहणं यस्या इति बहुब्रीहिः । ग्रहणमिति करणेल्युट । सामान्ये नपुंसकम् । एवञ्च अनुगतसंस्थानव्यङ्ग्या जातिरित्यर्थः। मृगत्व-हंसत्वादेरनुगत सस्थानव्यङ्ग्यत्वात् जातित्वम् । आकृतिर्हि अवयवसन्निवेशः ईदृशाकारो गौरत्याकृत्युप्रदेशादिव्यङ्ग्या जातिरिति यावत् । बाल्याद्यवस्थाभेदभिन्नानेकदेहवृत्तिदेवदत्तत्वादेराकृतिव्यङ्ग्यत्वेन तत्रातिव्याप्तिरिति तु न समानकालिकानेक व्यक्तिवृत्त्यनुगतसंस्थान व्यङ्ग्या इत्यर्थकरणात्, अवस्थाभेदेऽपि देहभेदाप्रतीतेः, स एवायामिति प्रतीतेः, अवस्थाभेदेऽपि तज्जातीयोऽयमित्यप्रतितेश्च । समानकालिकत्वनिवेशादेव इन्द्रत्वादिकं न जातिः । पञ्चेन्द्रोपाख्यानादिभिरनेकेषां समकालिकत्वेऽपि सर्वेषांसंस्थानस्यैकत्वमानाभावात् । जलसमीपदेश विशेषो हि तटम् तद्गतम् तटत्वञ्च जातिरिति आकृतिग्रहणत्वादे वात्रतटीत्यादौ ङीष्सिद्धिः।

भिन्नष्वाभिन्नाभिधानप्रत्ययनिमित्तं जातिरिति वेदान्तिमतसिद्धं जातिलक्षणम्, नित्यमेकमनेकानुगतं सामान्य मिति च नैयायिकानां जातिलक्षणम् इति एतदुभयमपि शुक्लादिगुणेऽतिव्याप्तमिति उपेक्षणीयं तत् । अतिव्याप्तिश्च (१) । शुक्लादिगुणानामेकत्वम् - भिन्नेष्वभिन्नाभिधाननिमित्तत्वात् घटत्ववत्सकलश्वेतपटदुग्धदधिशङ्खाम्बुजादिवृत्तित्वात् । नित्यत्वमपि घटत्वादिवदेवेतिपक्षे (२)। जननेन प्राप्यते सा जातिरिति अद्वैतिनां मतेऽपि न तत् जातिलक्षणं युक्तम् । युवत्वादौ अव्याप्तेः । ब्रह्मातिरिक्तसर्वपदार्थानां जन्मत्वेन परमाण्वादीनामपि जन्यतया सर्वत्र जन्मना जाति सम्बन्धस्य अद्वैतिमते एव संभवो बोध्यः । अत एव उक्तं वैयाक-

१- प्रकृतसूत्रे शेखरे वरवर्णिनी ।

२- द्वितयशङ्खादिषु सर्वत्र शुक्लः शुक्ल इतिसमानाकारप्रत्ययी समानशब्द प्रयोगेण तेषामपि घटादिवन्नित्यत्वमेकत्वञ्च सिद्ध्यतीति गुरुप्रसादः शेखरे ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रण सिद्धान्त लघुमञ्जुषायाम् "एतञ्च लक्षणमद्वैतिमते ब्रह्मातिरिक्तस्य सर्वस्य तन्मते जन्यत्वात् । अविद्यादेरपि जन्यत्वमुक्तम् । जीवनामपि उपाधीनां जन्यत्वेन विशिष्टानां जन्यत्वमेव । ब्रह्मणस्तु निर्धर्मकत्वात् तत्र जात्यभाव एवेति । एतञ्च तेषु लक्षणेषु अतिव्याप्त्यव्याप्त्या आकृतिग्रहणा जातिरित्येव जातिलक्षणम् ।

नचेवं ब्राह्मणत्वादीनां जातित्वं न स्यात् अवयवसंस्थानस्य वृषलादिसाधारण्येन तस्या आकृतिग्रहणत्वाभावात् अत आह लिङ्गानाञ्च न सर्वभाक् । सकृदाख्यातनिर्ग्राह्या । इति । असर्वलिङ्गत्वेसति एकस्यां व्यक्तौ कथनाद्व्यक्त्यन्तरे कथनं विनापि सुग्रहापि जातिरित्यर्थः । अत्र लक्षणे आख्यातम्-आख्यानम् उपदेशः । कथनात् इत्यस्य च उपदेशादित्यर्थः । एकस्मिन् मांसपिण्डे इन्द्रइत्युपदिष्टेऽन्यत्र-तद्ग्रहेप्रमाणाभावानेन्द्रत्वादिजातिः । ब्राह्मणत्वन्तु ब्राह्मण्यामुत्पन्नोऽयं ब्राह्मणः" इत्येवं रुपेण एकत्रोपदिष्टे तत्तत्पितृपितामहादिषु सुग्रहम् । ब्राह्मणपुत्रभ्रात्रादिषु तु न तद् ग्रहीतुं शक्यम्, ब्राह्मणपुत्रस्य ब्राह्मणभ्रातुश्च शूद्रादेरपि सम्भवात् । एवं वृषलत्वं तदपत्यतत्सहोदरादौ सुग्रहम् । अत्रवृषलपितृपितामहादिषु वृषलत्वं सुग्रहमिति न कथयितुं शक्यते, वृषलपित्रादेरन्यजातीयस्यापि सम्भवात् । एवञ्च एकस्यां वृषलव्यक्तौ वृषलत्वे कथिते तदपत्यतत्सहोदरादौ कथनं विनापि तस्य सुग्रहत्वात् असर्वलिङ्गत्वाच्च वृषलत्वं जातिरिति तद्बोध्यायां ङीष् भवत्यनेन प्रकृतसूत्रेण । एवमेव च ब्राह्मणाद् ब्राह्मण्यामुत्पन्ने ब्राह्मणोऽयमित्युपदिष्टे तत्पितृपितामहादिषु कथनं विनापि=उपदेशं विनापि तस्य सुग्रहत्वात्, ब्राह्मणो ब्राह्मणी इति उभयलिङ्ग मात्रत्वाच्च ब्राह्मणत्वं जातिरिति ब्राह्मणीत्यत्र अनेन ङीष् । वृषली च शुद्रा एव । अस्य च जातिलक्षणस्य अप्राप्तप्रापणार्थत्वात् तटस्तटी तटमित्यादौ सर्वलिङ्गेऽपि आकृतिग्रहणत्वादेव जातित्वं सिद्धमिति ना प्राप्तिशङ्का । देवदत्तत्वन्तु न जाति[1] तस्य असर्वलिङ्गत्वेऽपि अवस्थाभेदभिन्नानेकपिण्डवृत्तित्वेऽपि तदवयवानारब्धे पिण्डान्तरे तदनुपलब्धेः । ब्राह्मणाशब्दो नित्स्वरेण आद्युदात्तइष्यते, ङीषि तु अन्तोदात्तः स्यात् इति विचारणं तु शार्ङ्गरवादिपाठेन ङीनन्तो ब्राह्मणीशब्दो बोध्यः । अस्य द्वितीयस्य जातिलक्षणस्य स्वरूपोदाहरणन्तु वृषलीति बोध्यम् । जातिलक्षणद्वय साधारणन्तूदाहरणम् घटी इति बोध्यम् । इत्येतत् प्राचीनानां वैयाकरणानां मतम् ।

नागेशस्तु आकृतिग्रहणाइत्येव जातिलक्षणम् । अत्राकृतिपदमुपदेशोपल-

1- प्रकृत सूत्रे प्रक्रिया-प्रकाशे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्षणम् । उपलक्षणत्वञ्च स्वबोधवत्त्वेसति स्वेतरबोधकत्वम् । एवञ्च[१] आकृतिद्वारा साक्षादुपदेशेन वा ग्राह्या जातिरित्यर्थः । तत्र ईदृशाकारो गौरित्याकृति-उपदेशग्राह्या गोत्व-मृगत्वादि जातिः । "अयं ब्राह्मणः" अयं वृषलः" इति साक्षादुपदेश ग्राह्या ब्राह्मणवृषलत्वादिजातिः । यद्वा आकृति ग्रहणम् जातिग्राहकोपदेशस्योपलक्षणम्[२] । तेन शुक्लादिगुणानामयं शुक्लः इत्याद्युपदेशग्राह्यत्वेऽपि तादृशोपदेशस्य गुणग्राहकत्वेन जातिग्राहकत्वाभावान्नातिव्याप्तिः । लिङ्गानाञ्च न सर्वं भाक् इत्यशस्तु जातिस्वरुपानुवदामीमति न तस्य वैयर्थ्यम् । गोत्रञ्चेत्यादि पूर्ववत् अतिदश एव । एवञ्च आकृति ग्रहणा जातिरिति लक्षणकरणमुत्तरजाति लक्षणेन भाव्यस्थेन प्रकृतसूत्रस्थितेन सम्बद्धति । तच्च लक्षणान्तरम् ।

प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगवद् गुणैः ।
असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः ॥इति॥

अत्र सत्त्वम् । द्रव्यम् सीदति=गच्छति निविशते वा ,जात्यादिकं यत्र विशेषण भावेनेति विग्रह-विशरणगत्यवसादनेष्वर्थेषु वर्तमानात् धातुसंज्ञकात् कृत सत्वात् सद्धातोः " ताभ्यामन्यत्रोणादयः " इत्यधिकरणसाधन त्वप्रत्यये निष्पन्नत्वात् । सतो भाव इति विग्रहे " तस्य भावस्त्वतलाविति सूत्रेण त्व-प्रत्यये सत्त्वशब्दस्य निष्पादयितु शक्यत्वेन त्वतलोश्च समानार्थत्वेन सत्त्व-शब्दोऽय सत्ताबचन इति तु न , तस्याः नित्यत्वात् गुणशब्दासाहचर्यात् । एवञ्च सत्त्वस्य द्रव्यस्य प्रादुर्भावविनाशाभ्यां यः तौ प्राप्नोति सा जातिरितिः । यावद्-द्रव्यभाविनी जातिरितियावत् (३) अनेन लक्षणेन गोत्वब्रह्मनत्वाद्योरु-भयोरपि सग्रहः, तेषां यावद् द्रव्यभावित्वात् । यथा निर्गुणस्य द्रव्यस्य नोपलम्भस्तथा जातिरहितस्यापीति कयटः । अत्र असर्वलिङ्गामित्येतत्अनुवादकमेव शुक्लादिगुणानामयावद् द्रव्यभावित्वेन जातित्वाप्रसक्त्या तद्व्यावर्त्तन स्यानावश्यकत्वात् । वृषलत्वादीनामपियावद् द्रव्य भावित्वात् पूर्वेणैव जातित्वस्य सिद्धत्वाच्च । बह्वर्थामित्यस्य सर्वव्यक्तिव्यापिनीमित्यर्थः । एवञ्च एतल्लक्षणैकवाक्यतया पूर्वलक्षणेऽपि एकलक्षणत्वेन आकृतिग्रहणाजातिरित्येवं रूपेण

१— आकृतिद्वारा उपदेशेन साक्षाद्वा उपदेशेनेत्यर्थः ।

२— ईदृशाकारो गौः इति अयं ब्राह्मण इति च जातिग्राहकोपदेशः, अयं शुक्ल इत्यादिश्च गुणग्राहकोपदेशः ।

३— स्वाधिकरण द्रव्यत्तत्ताव्यापकसत्ताकत्वं जातित्वमितिचार्थः । इति च वरवर्णिनो , शेखरे ,, ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्याख्या उचिता । पूर्वत्रजातेरेकलक्षत्वादेव प्रकृत सूत्रे भाष्ये– " कः पुनरेत-योर्जातिलक्षणयोर्विशेषः यथा पूर्वलक्षणं तथा कुमारी भार्य इति भवितव्यम् यथोत्तरं तथा कुमारभार्या इति, लक्षणमिति एकवचनमेव प्रयुक्तम् । अत – एवाकडारसूत्रे आकृतिग्रहणा जातिरित्येवोक्तं भाष्ये । अत एव प्रकृतसूत्रे लिङ्गानाञ्च नसर्वभाग् इत्यादि जाते र्लक्षणान्तरकरणमनावश्यकमेव । एवञ्च आकृति ग्रहणम्– जाति ग्राहको पदेशस्यप्युपलक्षणमित्यभ्युपगम्य, आकृति-ग्रहणाजातिरिति यावद् द्रव्यभाविनी वा जातिरिति व्याकरणे प्रकृतसूत्रादौ ज़ातित्वं बोध्यमिति ।

सन्दर्भग्रन्थाः–
१ – शेखरः (वहुटीकासमेतः)
२ – सिद्धान्त– कौमुदी (तत्त्ववोधिनीसमेता)
३ – प्रक्रिया–कौमुद्याः प्रकाशः ।
४ – महाभाष्यम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साहित्यालङ्कारसरणौ भामहालङ्कारस्य प्रस्थानम्

रोहिणीवल्लभ शर्मा पोखरेलः,
उप-प्राध्यापकः
या. व. ल. विद्यापीठस्य महेन्द्रनगरस्थस्य

वक्तुः श्रोतुश्च हृदयाहारितया प्रभावोत्पादकतया विदूरावगाह्यर्थोपपत्त्युपस्थापकतया च वक्तव्यार्थस्य सङ्क्षेपप्रकृत्योपपादनं काव्यशास्त्रे वागिवच्छित्तिपदं समश्नुते तदेवालङ्कार मूलमिति भावितात्मनां विदां समयः । भवति च वक्तुः स्वाभाविकीयं रुचिः, यदस्तु मम वाक् श्रोतुर्मनोहारिणी विलक्षणार्थोपस्थापिनी प्रभावितोल्लासिनी पुनरल्पपदन्यासिनी चेति । नैषा रुचिप्रकृतिरद्यतनी इयं हि मानवेतिहास वागारम्भत एव प्रकृता या च ऋग्वेदमूला प्रतिष्ठते । ऋग्वेदीयस्योषः सूक्तस्य यमयमी संवादप्रभूतेश्च विषयोपस्थापनविलासितो वागुपन्यासः 'हितंब्रूयात्'प्रियंब्रूयात् इत्यादर्शवन् ' मितं च सारं च वचो हि वाग्मिता ' इति प्राख्यापयन्मनः प्रसादनं ग्रथनं प्रस्थापयति । तदेवंविधं संरचनावपुर्विविच्य तत्परवर्तिभिमनी षिभिर्वाक्चारुत्वापादक संस्थयाऽलङ्कार इत्यभिख्या व्यवस्थापिता प्रतिपद्यते । " का तेऽस्त्यरङ्कृति सूक्तैः" इति ऋग्वेदीये मन्त्रांशे 'सूक्त' शब्दे करण विभक्त्या 'अरङ्कृति' शब्देकर्तृ विभक्त्या च तदित्थं तत्त्वमाकूत विषयीकृतमास्ते इत्याभाति ।

ऋग्वेदसंहितायाः स्वरूपतः प्रमाणतश्चेदमुपतिष्ठते, यदार्याणां वाग्देव्याराधनक्रमः पद्यपद्यया प्रावर्तत, एवं चात्र विविधात्मकानां वस्तुतत्त्वाख्यानानां विषयाणां हृदयावर्जकविधया प्रस्तोतव्यस्याभिधेयस्य भावतीव्रत्वोपस्थापनाय सन्निवेशविशेषाविर्भाविता वाचामुरुधा प्रस्तुतिरस्फुरत् । इत्थङ्कारं वाग्वैचित्र्योपस्थितिप्रकारतया प्रकृतं मनःप्रसादि तत्त्वं रामायण–महाभारतकालं यावत् पृथग्विधि विवेचन पद्धति नासदत् । अथैवमपि वृद्ध-वैयाकरणन गार्ग्येण उपमा विषयिकी चर्चापन्यस्ता, यास्कनिरुक्ते च विवेचनपदवीं प्रपन्ना । निरुक्ते प्रपन्नमलङ्कारत्वप्रभाववीक्ष समुन्मीलनं ततोऽर्वाचीनानां मनीषिणां समीक्षाधियं प्रागल्भयतेति समाभाति । एवं हि यास्काचार्यतः पूर्वमादिकाव्यतयेतिहासवेदतया च प्रथितौ रामायण-महाभारत-सन्दर्भौ काव्यप्रकारावस्थिति निरदिशताम्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पाणिनेरष्टाध्यायीग्रन्थश्चोपमाद्यलङ्कारप्रकृत्यनुबन्धिनीं प्रक्रियां प्रस्तौति । इत्थं सङ्केतविधया काव्यालङ्कारविधायाश्चर्चा प्रसृताऽवर्ततेति सिध्यति । बहुचर्चितोऽयं विषयः पुराणग्रन्थे विष्णुधर्मोत्तरे काव्यालङ्काराणां पारिभाषिकतामश्नुते, एवमप्येतत् पुराणं काव्यशास्त्रतया न प्रासिध्यत् ।

इयता सन्निवेशेन साधितमथ च मनःप्रह्लादि विषयात्मक वाग्बन्धतयोपस्थापितं काव्यरूपं भरतमुनेर्नाट्यशास्त्रस्योन्मेषात् प्राक् स्वत्वघटनानुबन्धिनीं वीक्षां नासदत् । तदेवं मुनेरेतस्य शास्त्रमिदमेव साहित्यशास्त्रसमारम्भपरम्परायां बीजमास्त , अथैतदीयामास्थापनासरणिमनुगत्य श्रव्यकाव्यस्य दिगुपस्थिता , यया श्रव्यकाव्यलेखानुबन्धी शास्त्रसमारम्भः पर्यकल्प्यत , मनीषिणश्चात्र योगदानाय प्रायतन्तेति स्फुरति । एवमादिमे श्रव्यकाव्यशास्त्रस्योपजीव्ये द्रौहिणेर्नाट्यशास्त्रे नन्दिकेश्वरादीनां पुरातनानां साहित्यमर्मविदां मनीषिणां चर्चा ऽवदानं च पर्यालोच्यते अथाप्येतेषां सन्दर्भरूपाप्रस्थितिर्नासाद्यते केवलं प्रमाणकोटौ मतमुपस्थाप्यते । भरतमुनेरनन्तरं भामहाचार्यं यावत् मेधाविप्रभृतयः साहित्यसन्दर्भप्रणेतार आसन्निति नाट्यशास्त्रोल्लेखतो भामहालङ्कारग्रन्थोक्तितश्च प्रतिपद्यते , किन्त्वेष विषयः पुरावृत्तमापन्नः शास्त्रबन्धं न प्रत्यक्षयति । एवं स्थितौ समुपलभ्यमानेषु श्रव्यकाव्यविषयकसन्दर्भेषु भरतमुनेर्नाट्यशास्त्रमनु भामहीयं काव्यालङ्कारशास्त्रं वरीयस्तया प्रथते ।

भामहस्य दण्डिनश्च स्थितेः पौर्वापर्ये पुरावृत्तविदां कीथ–काणेडाडे–प्रभृतीनां दृष्टिर्दण्डिनं प्राक्तनमालोचयति , किन्तु संस्कृतशास्त्रसिन्धुमालोडयतोर्वटुकनाथ-बलदेवविदुषोर्मते भामहः प्राक्तनः सिध्यति । भामहालङ्कारस्य रचनाशैलीं प्रतिपादनप्रकृतिं चान्वीक्ष्यैतयोर्मतं सुस्थितमाभाति । तथाहि–प्राचां शास्त्रग्रन्थनप्रकारः सूत्रपद्धत्या वाचा प्रतिपद्यते, संस्थापना विश्वतोमुखार्था पुनरोचकतापेक्षया सारवत्त्वोपन्यासा प्रभवति । तदेवं प्रतिभावैभवविलसिते ललितवाङ्निबन्धनं प्रस्तुवति दण्डिनः काव्यादर्शे प्रतिपन्नां प्रतिपाद्यवस्तूपस्थापनप्रणालीं प्रपद्य वरीयसां शास्त्राणां संग्रथनप्रकृतिमालक्ष्य चैतदाकलयितुं शक्यते , यद्दण्डिनः कृतिरर्वाचीनभामहीया च प्राक्तनीति । आस्तां तावदेषा विचारणा ।

भावाभिव्यक्तिः कवितायाः स्रोतः तच्च कवयितुश्चेतसि द्रवत् शब्दप्रणालीमापद्यमूर्तया विधया ऽभिव्यक्ता ललिता प्रस्तुतिः कविता ,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्या व्यूहो नाम काव्यम् । भरत मुनिना स्वकृतौ नाटचशास्त्रे तदाङ्गीन प्रस्तुवता षड्त्रिंशद्विधानि लक्षणानि,लक्षितानि,एभिः संवलितोवाग्विस्तरः काव्य - माम्नायत । दृश्यकाव्यविधानशास्त्रप्रणयैकतानतयाऽनेन नाटचतत्वोपयोगि यावद्विषयवस्तु विविच्य प्रस्तुत्य च विविध प्रकृतेः काव्यप्रतिभाया उर्वरं क्षेत्र मास्थापितम् , कलोपपत्तिक वीजं च समुप्तम् । यद्रुचिफलत एतदीयं शास्त्रं काव्यतत्त्वोन्मेषस्य विश्वकोषः संवृत्तमस्ति । अपि चैवं जनमानसाह्लादितत्त्व– विधयाऽत्र शास्त्रे वागलङ्कारविधिः स्वरूपं प्रभेदश्च तेन मुनिना व्यशेषि । तदित्थमुपपन्नं भावनीयमाकूतमाकलय्य तत्परवर्तिभिर्भामहात् पौरस्त्यै– रालङ्कारकैः श्रव्यकाव्यविधिसन्दर्भः संदृब्ध आसीदिति मनितुं शक्यते । एवमपि भरतभामहयारन्तराले ग्रथितो ग्रन्थ एतदवधि नोपलभ्यत इति भामह एव श्रव्यकाव्यस्य शास्त्रकार इति विभावकैर्विभावितमस्ति ।

अथ भामहाचार्यः स्वकाव्यशास्त्रे तावत् काव्यस्य स्वरूपं विमृशन् कवित्वतत्त्वं प्रतिभाविलासैकरोचितं रुचिरं पुनः सुदुर्लभ रोचिराम्नाय स्थेयस्याः कीर्तेर्निदानतया न्यरुपयत् , तद्व्यूह प्रकारांश्च समुदभावयत् । तथा हि–प्रथ- मतो गद्य-पद्य विधया द्विधात्मकम्, संस्कृतम् प्राकृतमपभ्रंशश्चेति त्रिविधा भाषा प्रकृतिः, वृत्तदेवादिचरितशंसि, उत्पाद्यवस्तु, कलाश्रयम्, शास्त्राश्रयं चेति चतुष्कलं वस्तु,सर्गबन्धः,नाटकम्,आख्यायिका,कथा,अनिबध्दं [गाथादिकम्] चेति पञ्चधा जातिश्चेति । इत्थं काव्यसंरचना प्रकृतिं प्रस्तुत्य तद्भूत्तिकयोः शब्दार्थयोः साहित्ये चारुतातत्वं वक्रोक्तिमाख्यत् । एतद्विभावनं भामहस्य मौलिकी प्रस्तुतिः, या हि काव्यालङ्कारेषु जीवातुविधिं तनोति । ''युक्तं वक्र स्वभावोक्त्या सर्वमेवैतदिष्यते १.३०,, ''वक्राभिधेय शब्दोक्तिरिष्टा वाचामलङ्कृतिः–१.३६'' '' सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यत –२.८५'' सर्वैवातिशयोक्ति...२ ८४''इत्याद्युक्त सन्दर्भोक्त्या भामहाचार्योऽयं काव्याभिधेयं प्रतिपादयितुं शब्दार्थयोरन्तःस्थं काव्य- रोचिर्भावयितुं च वक्रोक्तितत्वं सर्वातिशायितया व्याप्रियत स्फुटीचकार । अथ माधुर्यम् , प्रसादः, ओजश्चेति गुणानां त्रैविध्यमास्थाप्यप्राचामभिमतं दशविधत्वं न्यगकरोत् । एवं च वाचां चारुत्वरूपामलङ्कृतिं बिवृण्वन्नयमाचार्यः कवेर्यत– नीयतयाऽलङ्कारत्वसिद्धितया च वक्रोक्तिमस्तौत् । प्राणदातृत्वं चास्याः प्रतिजानीते काव्यदोषान् विविच्य न्यायनिर्णयं प्रोक्तवान् शब्दशुद्धिविचारं च समदृभत् । अन्त– तोयमाचार्यो भामहः-''षष्ठचा शरीरं निर्णीतं शतषष्टया त्वलङ्कृतिः पञ्चाशता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दोषदृष्टिः सप्तत्या न्यायनिर्णयः। षष्टचा शब्दस्य शुद्धिः स्यादित्येवं वस्तु-पञ्चकम्, उक्तं षड्भिः परिच्छेदैर्भामिहेनक्रमेण वः" इत्थमुद्घोष्य समुपसमहार्षीत् स्वसन्दर्भ शास्त्रम्।

भरतमुनिना दृश्यकाव्यशास्त्रं प्रवध्य समुन्मीलितां काव्यकलातत्त्वोल्लासिनीं वीक्षां विविच्य प्रतिभाविलासवैदग्ध्यात् प्रथितं श्रव्यकाव्यशास्त्रवर्त्म भामहेन सन्दर्भतयोपनीय परवर्तिनामालङ्कारिकाणां विचारणाभूमिरापादितेति प्रतीति-पथमवतरति। तथा ह्येतदीयां वीक्षारुचिं वक्रोक्ति कुन्तको व्यशदयत्, गुणाति-शययोगाद्भावितं लोकातिशायिवचोऽतिशयोक्तिः, तदनन्या वक्रोक्तिरलङ्कार-त्वोपपत्तौ जीवातुरिति यावदालङ्कारिकाणां समयः समजनिति "क्रमागतं श्रुति-सुखं शब्दमर्थ्यमुदीरयेत्, अतिशेते ह्यलङ्कारमन्यं व्यञ्जनचारुता— ६२८ इति प्रस्थापयता चानेन व्यञ्जनावृत्तेरस्तित्वोन्मेषः प्रथितः, "जनको गवि गोबुद्धेर्मृग्यतामपरो ध्वनिः—६.१७" इत्युक्त्या ध्वनितत्त्वस्य सङ्केतः प्रत्तश्च, यौ च ध्वनिवादस्य प्रवर्तक आनन्दवर्धन उपपत्तिपूर्वकं काव्यमर्म प्र-त्यज्ञास्त। एतन्मतं गुणानां त्रैविध्यं मम्मटोऽप्यन्वसरत्। एवं च परवर्तिभिरालङ्कारिकैः कियदंशतोऽपि चर्चिताऽथ च परिगृहीतैतदीया श्रव्य काव्यशास्त्रसमारम्भसरणि प्रथमां रेखाङ्कनामादधाति विराजते।

भामहीयः काव्यालङ्कारसन्दर्भो विषयवस्तूपस्थापनप्रकृत्या प्रकीर्ण आभाति, यतोह्यत्र काव्यधर्माणां गुणदोषालङ्काराणां निरूपणक्रमो व्युत्क्रान्त इति परिशी-लयितुमसुकरोवर्तते। तदप्ययं काव्यत्ववीक्षां विभाव्यार्वाचीनानां समीक्षाधियं-समेधयन् काव्यालङ्कारसरणौ किमप्यभिनवं प्रस्थानं प्रस्तुवन् श्रव्यकाव्यरुचिं व्यतनोदिति संस्तूयते।

रक्रिलगोमिसूनुरयं भामहः शारदादेशात्मके काश्मीरे जन्म लेभे, सोऽय-माचार्योदिङ्नागाचार्यतोऽर्वाचिनः श्रीमदानन्दवर्धनाचार्यतः (ध्वनि-प्रस्थापक आचार्यः) प्राक्तन इति समुल्लेख्य प्रमाणोदाहरणैश्चतुर्थपञ्चम शतकयो मध्येऽवस्थितिमभजतेतिपुरावृत्तगवेषकैराचार्यवलदेवादिभिः समास्थापितम्। अथ चास्य कृतेर्मङ्गलाचरणस्थं सर्वज्ञपदमालोच्य बौद्ध-धर्मानुयायिनमिमं केचिन्मन्वते, किन्त्वेतदीयेषु रचना सन्दर्भेषु बौद्धं चरितं क्वापि वर्णनाविषयीकृतं नासाद्यत इति तत् सर्वज्ञ पदाधारतो बौद्धं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्थिरयितुं दुर्घटमिति तदितरे वैदिक धर्मानुयायिनं समर्थयन्ति। इत्थं वैमत्यं प्रसृतमेवास्ति । भामहस्य तिस्रः कृतयः समीक्षकैरालोचिताऽऽसाद्यन्ते, ताश्च वररुचेः प्राकृतप्रकाशस्य मनोरमा वृत्तिः, कश्चिच्छन्दोग्रन्थः, प्रस्तुतविषयकः काव्यालङ्कारसन्दर्भश्च। आचार्योऽयं काव्यशास्त्रप्रणेतृष्वग्र्यासनमासिनः काव्यदिधावलङ्कारपक्षस्यप्रबलः पक्षधरश्च, तदेवमलङ्कारसम्प्रदाचार्यतया काव्यालोचकपरम्परायां समाद्रियत इति।

—×=

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शाङ्करवेदान्ते महावाक्यमीमांसा

श्रीगोपालनिधि तिवारी
वेदान्ताचार्यः M. A. English

'वेदान्तविज्ञानसुनिश्चितार्थाः' (मुण्ड० ३–२–६), 'वेदान्ते परमं गुह्यम्' (श्वेताश्व. ६–२२) इत्यादिश्रुतिवचनानि वेदान्तस्य स्थितिरनादिकालत एवेति बोधयन्ति। श्रीमद्भगवद्गीतायामपि भगवतः श्रीकृष्णस्य वचनमस्ति यद् वेदान्तकृद्वेदविदेवचाहमिति' (१५–१५)। महर्षिबादरायणेन ब्रह्मसूत्राख्य वेदान्त दर्शनसूत्राणि विरचितानि। श्रुति–स्मृति–सूत्रादि ग्रन्थेषुपलभ्यमानो वेदान्तशब्दो वेदसिद्धान्तवाचीति स्पष्टं ज्ञायते। श्रीसदानन्देन वेदान्तो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि चेति समुद्घोषितं वर्तते। वेदानां सारभूतो भागो ज्ञानकाण्ड एवेति ज्ञानभाग एव वेदान्तशब्देन गृह्यमाणो विद्यते। वेदानामन्तो निष्कर्षो वेदान्त इति विदुषां मतं साधीयः।

श्रीशङ्करभगवत्पादा बहुषु वेदान्त ग्रन्थेषु भाष्याणि विरचयन्तो वेदान्तस्य परमरहस्यं प्रकटितवन्तः। श्रीशङ्कराचार्यैरनादिकालत एव प्रचलितस्य दर्शनमूर्धन्यस्य वेदान्त दर्शनस्य गूढतत्त्वस्य प्रकाशनं विहितम्। तच्च गूढतत्त्वं वेदनिष्कर्षरूपमद्वैतसिद्धान्ताख्यमिति विद्वत्सु सुव्यक्तमेव। शङ्करमतानुसार प्रणीता अन्ये ग्रन्थटीकादयोऽपि शाङ्करवेदान्तकोटौ समायान्ति। श्रीमच्छङ्करभगवत्पादानां प्रकरणग्रन्थादयः सुगमतया जीवब्रह्मैक्यबोधका इति सुविख्यातमेव।

जीवब्रह्मणोरैक्यमेव वेदानां ज्ञानकाण्डस्य सारभूतमिति वेदानां महनीयतत्त्वप्रकाशकं ब्रह्मात्मैक्यप्रतिपादकं वाक्यं महावाक्यमिति व्यवह्रियते। अभेदप्रतिपादकं वाक्यं महावाक्यमिति सुस्पष्टमेव। महावाक्यार्थबोधे ऽवान्तरवाक्यर्थबोधो हेतुरिति विद्वांस=प्रतिपादयन्ति। शाङ्करवेदान्ते जीवप्रतिपादकानि वाक्यानि ब्रह्मप्रतिपादकानि वाक्यानि चा ऽवान्तरवाक्यानीति ग्रहीतुं युक्तम्। जीवब्रह्मणोरभेदप्रतिपादकानि वाक्यानि तु महावाक्यानीति स्वीक्रियन्ते। एवंप्रथमतश्चतुर्णां वेदानां महावाक्यानि चत्वारि प्रसिद्धानि यथा – ऋग्वेदस्य महावाक्यं प्रज्ञानं ब्रह्मेति (ऐ. ३। ३) यजुर्वेदस्याऽहंब्रह्मास्मी ति (बृ. ५।४।१०) सामवेदस्य तत्त्वमसीति (छा. ६।६।८।७) अथर्ववेदस्या ऽयमात्मा ब्रह्मेति (मा. २) पुनश्च कृष्णयजुर्वेदस्य महावाक्यं तु स यश्चायं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुरुषे यश्चासावादित्ये स एक इति (तै. २।८।५)। प्रसिद्धानि महा-वाक्यानि पूर्वोक्तानि पञ्च सन्त्यपि जीवब्रह्मणोरभेद प्रतिपादकान्यन्यान्यपि श्रुतिवाक्यानि महावाक्यानि भवितुमर्हन्ति। अतो ऽष्टोत्तरशतोपनिषदां सार-संग्रह इति नाम्ना महावाक्यरत्नावलिः श्रीमत्परमहंसपरिव्राजकाचार्यराम-चन्द्रयतिसंपादिता प्राप्यते। तत्र यतिवर्यैरष्टोत्तरसहस्रं महावाक्यानि सङ्कलि-तानि। ततो ऽप्यधिकानि महावाक्यान्युपनिषद्भ्यः सङ्ग्रहीतुं शक्यन्ते। उप-निषन्महावाक्यानि तत्त्वमसीत्येवं जातीयकानि दुःखव्रातादुद्विधीर्षन्ति।

मीमांसाशब्दस्यवाच्यार्थोऽत्र विवेचनमिति लक्ष्यार्थश्चात्र तात्पर्यविचार इति गृहीतं वर्तते। तात्पर्यं वेदे मीमांसापरिशोधितन्यायादेवावधार्यत इति प्रसिद्धमेव। महावाक्यं खलु वेदवाक्यं तस्य तात्पर्यं पूर्वोक्तरीत्यैव भवितुमर्हति। सर्वेषां महावाक्यानां जीवब्रह्मैक्य एव तात्पर्येण पर्यवसानमिति शाङ्करवेदान्तेन प्रतिपाद्यते। जीव एवोपाधिरहितं ब्रह्मेति तात्पर्यनिर्णयलिङ्गत उपक्रमोपसं-हारादितः सिद्ध्यति। मीमांसाशब्दस्यार्थं स्पस्टीकुर्वद्भिः षड्दर्शनटीकाकृद्भिः श्रीवाचस्पतिमिश्रमहोदयै ब्रह्मसूत्रशाङ्करभाष्यटीकायां भामत्यां, पूजितविचार-वचनो मीमांसाशब्द' इति समुद्घोषितम्। अतः शाङ्करवेदान्ते महावाक्यमी-मांसेत्यनेनात्राऽद्वैतवेदान्ते महावाक्यविचार इति विवक्षितम्।

अज्ञानेन कल्पितस्य जीवब्रह्मभेदभावस्य महावाक्योत्थैकत्वविज्ञानेन विलय इति वेदसिद्धान्त इति शाङ्करवेदान्तस्य हृदयम्। वाक्यवृत्तौ श्रीशङ्करा-चार्यास्तत्त्वमस्यादिवाक्योत्थं जीवपरमात्मैक्यनेव मुक्तिसाधनमिति समुद्घोष-यन्ति। तत्त्वमसीत्यादिमहावाक्येषु भागत्यागलक्षणेति श्रीशङ्कराचार्यैर्निश्चितं वर्तते। यत्र मुख्यार्थस्यान्वयाऽसंभवस्तत्र लक्षणेष्यतएव। तत्त्वमसीत्यादौ तत्पदवाच्यस्य सर्वज्ञत्वादिविशिष्टस्य त्वपदवाच्येनान्तः करणविशिष्टेनैक्यायोगादैक्यसिद्ध्यर्थं स्वरूपे शुद्धचैतन्ये लक्षणा। सा च जहदजहल्लक्षणा भवितुमर्हति। यत्र विशिष्टवाचकः शब्द एकदेशं विहा-यैकदेशे वर्तते तत्र जहदजहल्लक्षणेति शास्त्रकाराः समामनन्ति। तदेव श्रीशङ्क-राचार्याणां मतमिति सुस्पष्टं यथा—

तस्मात्तत्त्वमसीत्यत्र लक्षणा भागलक्षणा
वाक्यार्थसत्त्वाखण्डैकरसता सिद्धये मता ॥७५२॥
भागं विरुद्धं सन्त्यज्याऽविरोधो लक्ष्यते यदा
सा भागलक्षणेत्याहुर्लक्षणज्ञा विचक्षणाः ॥७५३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(श्रीशङ्कराचार्यप्रणीते)— सर्ववेदान्तसिद्धान्तसारसंग्रहे

वाच्यार्थानुपपत्त्यैव वाक्यार्थसिद्धये लक्षणा समाश्रीयते, सम्बन्धानुपपत्त्या च लक्षणेति बुधैर्मन्यते । यत्र वाच्यार्थस्य सर्वथैव परित्यागस्तत्र जहल्लक्षणा भवति –यथा 'गङ्गायां घोष' इत्यत्र गङ्गापदस्य वाच्यार्थस्य प्रवाहरूपस्य सर्वथा परित्यागेन लक्षणया तत्सम्बन्धितीररूपलक्ष्यार्थस्य ग्रहणम् । तथा च श्रीशङ्कराचार्या आहुः— 'गङ्गासम्बन्धवत्तीरे लक्षणा सम्प्रवर्तत' इति

– सर्व. वे. सा. सं. ७३६ श्लो.

यत्र वाच्यार्थस्य परित्यागं विनाऽन्यलक्ष्यार्थस्यापि ग्रहणं तत्राजहल्लक्षणेति मन्यते, यथा 'काकेभ्यो दधि रक्ष्यतामिति' अत्र वाच्यार्थस्य काकस्य तथा दध्युपधातकत्वधर्मेणाऽकाकस्यबिडालादेरपि प्रतीतिर्भवति । अतोऽत्राऽजहल्लक्षणेति मन्यते ।

यत्र तु विरुद्धांशपरित्यागपूर्वकं भागे लक्षणा क्रियते अर्थाद् भागं विरुद्धं सन्त्यज्याऽविरोधो लक्ष्यते तत्र भागलक्षणा वा जहदजहल्लक्षणा मन्यते । यथा 'तत्त्वमसि' 'अहं ब्रह्माऽस्मी' त्यादौ । तत्त्वमसि त्यत्रसर्वज्ञत्वाल्पज्ञत्वरूपविरुद्धांशं परित्यज्य केवलसन्मात्रं निर्विकल्पं निरञ्जनं शुद्धचैतन्यं लक्ष्यते । ऐक्यञ्च शुद्धचैतन्य एव, तथा हि श्रीशङ्कराचार्याः — ऐक्यं तयोर्लक्षितयो र्न वाच्ययो रित्यादि (वि. चू. २४४) ।

अत्र त्वंपदार्थमात्रस्य शोधनं विधायाऽशुद्धतत्पदार्थे नैव संमेलनं विधेयं पुनश्चाऽशुद्धतत्पदार्थस्य पश्चात् शोधनं भविष्यतीति नैवऽनुसन्धेयं यतः श्रीशङ्कराचार्याः प्रतिपादयन्ति –

एतावुपाधी परजीवयोस्तयो,
सम्यङ् निरासे न परो न जीवः
राज्यंनरेन्द्रस्य भटस्य खेटक -
स्तयोरपोहे न भटो न राजा ॥
(वि. चू . २४६)

यथा भटमात्रस्य खेटकरूपोपाधिं परित्यज्य राज्यरूपोपाधिपरित्यागविरहीते सोपाधिकेनरेन्द्रे भटस्यैक्यं न भवति,तथा जीवमात्रस्याऽविद्यारूपोपाधि परित्यज्य मायारूपोपाधिपरित्यागविरहिते सोपाधिक ईश्वरे जीवस्यैकं न संभवति किन्तु निरूपाधिकयोरेव ।योरैक्यं संभवति , यथा निरूपाधिकयो र्भटनरेन्द्रयोः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीशङ्कराचार्याः पुनः समुद्घोषयन्ति – यद्

यथा तथा तत्त्वमसीति वाक्ये
विरुद्धधर्मानुभयत्र हित्वा ।। २५० ।।
संलक्ष्य चिन्मात्रतयासदात्मनो–
रखण्डभावः परिचीयतेबुधैः ।।
एवं महावाक्यशतेन कथ्यते
ब्रह्मात्मनोरैक्यमखण्डभावः ।।
(वि. चू. २५१)

महावाक्यानांसङ्ख्यानामियत्ता न वर्तत इति चात्र सूचितम् , अर्था ऽ जीवपरमात्मैक्यप्रतिपादकानि वाक्यानि बहूनि भवितुमर्हन्तीति ।

ब्रह्मैवाहमस्मीत्यनुभवो नित्यानन्दैक धाम वा स्वस्वरूपावस्थितिरेव । अत एव श्रीशङ्कराचार्या ब्रह्मानुचिन्तन आहुः :–

अहमेव परं ब्रह्म निश्चितं चित्त चिन्त्यताम्
चिद्रूपत्वादसङ्गत्वादबाध्यत्वात्प्रयत्नतः ।। इति

तत्त्वमसीत्यादि श्रुतिः शुद्धं कुटस्थमद्वैतं वोधयतीति श्रीशङ्कराचार्या आहुः – तथाहि -

प्रत्यक्त्वादीन् परित्यज्य जीवधर्मास्त्वमः पदात्
सर्वज्ञत्वपरोक्षादीन् परित्यज्य ततः पदात्
शुद्धं कूटस्थमद्वैतं बोधयत्यादरात्परम् ।।
(तत्त्वोपदेशे ४० ।१२.४१)

प्रसिद्धानां चतुर्णां महावाक्यानामर्थप्रकाशका ' येनेक्षते शृणोती'त्यादयोऽष्टौ मन्त्राः श्लोका वा शुकरहस्योपनिषदि श्रीविद्यारण्यस्वामिप्रणीते पञ्चदशीमहा - वाक्यविवेकप्रकरणे च विद्यन्ते । तत्रप्रकशिता अर्थाः संक्षेपेणात्र प्रस्तूयन्ते-

प्रज्ञानं ब्रह्मेत्यत्र प्रज्ञानशब्देन तच्चैतन्यं गृह्यते यत् सकलेन्द्रियैरन्तः करण वृत्ति भेदैश्चोपलक्षितं वर्तते । ब्रह्मशब्देन देवमनुष्याश्वाकाशादिषु जगज्जन्मादि हेतुभूतं यदेक चैन्यमस्ति तदेव गृह्यते । अतश्चैतन्याविशेषादै - क्यमिति सुष्ठु ।

अहं ब्रह्मास्मीत्यत्र देहे बुद्धयुपलक्षितस्य सूक्ष्मशरीरस्य साक्षितयाऽदिकारित्वेन प्रकाशमान आत्मालक्षणयाऽहंपदेनोच्यते । ब्रह्मशब्देन तु स्वतः पूर्णःपरमात्मा गृह्यते । अस्मीतिपदेनैक्यं परिलक्ष्यत इति साधु ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्त्वमसीत्यत्र तत्पदेन स्वागतादिभेदशून्यं नामरूपरहितं सद्वस्तु गृह्यते। त्वंपदेन तु देहेन्द्रियातीतं वस्तु लक्ष्यते। असीतिपदेनैकता ग्राह्यते। एवञ्चैक्यमेंवात्रापि प्रस्तूयते।

अयमात्मा ब्रह्मेत्यत्राऽयमात्मेति पदद्वयेन स्वप्रकाशसाक्ष्यात्मा गृह्यते। ब्रह्मशब्देन तु दृश्यत्वेन मिथ्याभूतस्य सर्वस्याकाशादेरधिष्ठानतयाऽवशिष्टं यच्चैतन्यं सदाख्यं तदेव लक्ष्यते। एवंरीत्या सर्वत्र महावाक्येषु लक्षणया जीवब्रह्मणोरैक्यमेव प्रतिपाद्यते। जीव–ब्रह्मणोरैक्यं विना निखिलानर्थनिवृत्तिर्नैव संभवति। नाविदितचरमिदं बिदुषां यज्ज्ञानं विना परा शान्ति नैव लभ्यत इति। ज्ञानञ्चात्र जीवब्रह्मैक्यज्ञानमेव निश्चितम्।

प्रपञ्च मिथ्यात्वपूर्वकं जीवब्रह्मणोरैक्यप्रतिपादनेन चिन्मात्रं स्वस्वरूपमिति निश्वप्रचम्। महावाक्यज्ञानान्ते भ्रमनिवृत्ति र्भवति ' ततश्चाधिष्ठान–रूपं चैतन्यमेवावशिष्यते। एतदेव श्रीशङ्कराचार्याः शतश्लोक्यां स्पष्टं प्रतिपादयन्ति। तथाहि–

रज्ज्वज्ञानाद् भुजङ्गस्तदुपरि सहसा भाति मन्दान्धकारे
स्वात्माऽज्ञानात्तथासौ भृशमसुखमभूदात्मनो जीवभावः
आप्तोक्त्या हि भ्रमान्ते स च खलु विदिना रज्जुरेका,तथाऽहं
कूटस्थो , नैव जीवो निजगुरुवचसा साक्षिभूतः शिवोऽहं ॥९४

प्रपञ्चविनाशेऽपि स्वात्मनाशः कदापि न संभवति। एवं देहत्रयवि–नाशेऽपि स्वात्मनाशः कथं संभवेत्? स्वात्मा तु ब्रह्मैव, ब्रह्मण्यतिरिक्तं किमपि सत्यं न वर्तते। अज्ञानादेव द्वैतभ्रमः सज्जातः। महावाक्यविचा–रोत्थब्रह्मज्ञानतोऽज्ञानस्य विनाशस्ततश्चाऽद्वैतानुभूततः सर्वदासच्चिदानन्दल–क्षणं ब्रह्मैव विद्यमानं साक्षात्करोति ज्ञानी पुरुषः। अज्ञानं तु कार्येण सह नासीदस्ति भविष्यतीति पूर्णबोधं लभते सः। बोधोदये सूर्योदये ऽन्धकार इवाऽविद्या विलीयते। ततश्च'ब्रह्मैवाहं समः शान्त इति, स्थितिः सञ्जायते। अपरोक्षानुभूतौ श्रीशङ्कराचार्या आहुः -

रज्जुरूपे परिज्ञाते सर्पभ्रान्ति र्न तिष्ठति
अधिष्ठाने तथा ज्ञाते प्रपञ्चः शून्यतां व्रजेत् ॥ ९६

इति

अधिष्ठानरूपब्रह्मसाक्षात्कारे द्वैत भ्रान्ति र्न तिष्ठति। ब्रह्मसाक्षात्का–रानन्तरं प्रारब्धकर्म क्षयपर्यन्तं बाधितानुवृत्तिद्वारा ज्ञानिनां जीवनं प्रचलत्यपि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्र कर्तृत्व भोक्तृत्वादिबुद्धिर्नैव तिष्ठति । महावाक्यविचारोत्थज्ञानेनैव मायाऽविद्ययोरुपाधिरूपयो विनाशेन शुद्धचैतन्यस्वरूपमेवाऽवशिष्येत । श्रीमद्भगवद्गीतायां 'ज्ञानीत्वात्मैव मे मतम्' (७।१८) इति वचने भाष्यं विरचयद्भिः श्रीशङ्कराचार्यैः समुल्लिखितं यज्ज्ञानी तु आत्मा एव न अन्यो मत्त इति मे मम मतं निश्चय इति । अतो ज्ञानी सच्चिदानन्दलक्षणं ब्रह्मैव । ब्रह्मसूत्रग्रन्थेऽपि 'आत्मेति तूपगच्छन्ति ग्राहयन्ति चेति (४।१।३) सूत्रे भाष्यं कुर्वद्भिः श्रीशङ्कराचार्यैः स्पष्टीकृतं यत् परमात्मा आत्मेत्येव प्रतिपत्तव्य इति,यतो जाबाला आत्मत्वेनैवैतमुपगच्छन्ति 'त्वं वा अहमस्मीति' । तथाऽन्येऽपि 'अहं ब्रह्मास्मी' त्येवमादय आत्मत्वोपगमा द्रष्टव्या इति । तत्सत्यं स आत्मा तत्त्वमसीत्येवमादीन्यपि (छा. ६-८-७) मन्त्ररत्नानि आत्मत्वेनैव ग्राह्यन्तीति । अतो जीवपरमात्मनोरैक्योपासनया क्रमशो निर्विकल्पसमाधेः परिपक्वावस्थायां शुद्धचैतन्यस्वरूपमात्रमवशिष्यते । ततः सकलदुःखात्यन्तिकनाशो भवत्येव । अत्र निवृत्तस्यैवानर्थजातस्य निवृत्तिः प्राप्तस्यैवानन्दस्य प्राप्तिरिति निश्चीयते । भ्रमस्यापसारणमेवपुरुषस्य कर्तव्यमिति सिद्धयति । भ्रमस्त्वज्ञानजन्यस्तस्यापसारणञ्च ज्ञानोदयत इति महावाक्यजन्यजीवब्रह्मैक्यज्ञानस्यावश्यकता वर्तते।अतो निष्कामकर्म-साधनचतुष्टय- श्रवणादिचतुष्टयतो मलविक्षेपावरणापाया न्महावाक्यसारभूता स्वस्वरूपावस्थितिरूपा चितिरेव केवलाऽवशिष्यत इति शम् ।

—०—०—

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देवीतत्त्वम्

उपप्रा० विष्णुप्रसाद न्यौपाने
म. सं. वि. वि.
विश्वविद्यालय विद्यापीठम् दाङ

जगतः सृष्टिस्थितिलयकर्त्री परमा माता सच्चिदानन्दात्मिका भगवतीदेवी ब्रह्मस्वरूपिणीतिविदितचरमेव समेषां विज्ञानाम् "अहं ब्रह्मस्वरूपिणी (देवी अथर्व शीर्षम् मन्त्र२)। भगवती देवी अवस्थात्रयातीता सती ब्रह्मरूपेण विराजते। नित्यतया सच्चिदानन्दरूपायास्तस्या जन्मादि विकारो न संभवति। यदा भूतले अधर्माधिक्यं धर्मविलोपश्चतदा अधर्मकर्तृणां विनाशाय धर्मकर्तृणां संरक्षणाय अवतरति (प्रादुर्भवति) तदा भगवती माता समुत्पन्नेति कथ्यते "देवानां कार्यसिद्धचर्थमाविर्भवति सा यदा। उत्पन्नेति तदालोके सा नित्याप्यऽभिधीयते" – दुर्गासप्तशती १।६६।

भगवती देवी स्वाश्रययामायया जङ्गमाजङ्गमात्मकं जगज्जनयित्वा सकलप्राणिनां हृदये स्वयमेवात्मरूपेण विराजते। पञ्चभूतविरचिते पञ्चकोशात्मके नश्वरे शरीरे विराजमानाऽपि चिद्रूपिणी भगवती निर्लिप्त साक्षिरूपेण बुद्धयादिकं प्रचोदयति प्रचालयति प्रकाशयति च। तस्या एव सत्तामासाद्य असदपि शरीरं सदिव दृश्यते। तस्या एव चिदंशमादाय जडमपि शरीरं चैतन्यवदिव प्रचलल्लक्ष्यते। वाङ्मनसागोचरायास्तस्या महिमान मुदीरयितुं ब्रह्मविष्णु महेश्वराः सहस्रजिह्वः फणिपतिश्च न प्रभव इति के वयं वराकाः। तथापि स्वात्मरूपेण विराजमानायाः करूणापारावारायाः निजजनन्यास्तस्या एव प्रेरणया वालकाः पुत्रा वयं तन्महिमलेशवर्णने चापल्यं प्रदर्शयामः।

हे जगज्जननि! महालक्ष्मी रिति प्रसिद्धा त्वमेव प्रत्यक्षं ब्रह्मासि। त्वमेव गुणत्रयपरिलषितां मायामादाय तमोगुणेन विशालनयनां कृष्णवर्णां दीर्घदंष्ट्राङ्कितवदनां चतुर्भि र्भुजैः करवालं पानपात्रं रूधिरस्रावि शिरः खेटं च बिभ्रती पापात्मनां भयङ्करीं कालीं सृष्टवती। सा भवतामुपकाराय महामाया, महाकाली, महामारी, क्षुधा, तृषा, निद्रा, कालरात्रिश्चेत्यादि नामभिर्विश्वप्रसिद्धा जाता। पुनः शुद्धसत्वगुणेन सातिशयसुन्दरं सरस्वती–

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रुपं जनयित्वा महाविद्या, महावाणी, भारती वेदगर्भेत्यादि नाम कृतवती । ततस्तवैवाज्ञया काली सरस्वती च मिथुनं जनयामासतुः, स्वयमपि त्वं मिथुनं जनितवती । त्वं स्वयं ब्रह्मा, लक्ष्मीश्चेति मिथुनं सृष्टवती । महाकाली चन्द्रशेखरं धवलवर्णं महादेवं धवलवर्णामिव सरस्वतीरूपां स्त्रियं सृष्टवती । सरस्वती तु कृष्णवर्णं विष्णुं गौरवर्णामुमां च सृष्टवती ।

हे महालक्ष्मी ! सृष्टेषु तेषु तासु च लक्ष्मीं विष्णवे, सरस्वतीं ब्रह्मणे, गौरीं महादेवाय दत्तवती । एवं ब्रह्मविष्णुशिवात्मका स्त्रयः पुरूषाः स्वस्वशक्तिविशिष्टाः सन्तः सृष्टिस्थितिलयकर्मसञ्चालनसमर्थाः सञ्जाताः । एवं मायामयप्रपञ्चरचनानिपुणाऽपि त्वं वस्तुतो निष्प्रपञ्चा सती ब्रह्मरूपेण सर्वोपरि विराजसे ।

महाकाली

दुर्गासप्तशत्यां चरितत्रये क्रमेण महाकाली, महालक्ष्मी, महासरस्वतीरूपेण भक्तजनानां पूजोपासनार्थं त्रिरूपाया भगवत्याः स्वरूपं वर्णितमस्ति । तत्र प्रथमं महाकाल्याः स्वरूप विषये विचारयामः । वाङ्मनसातीत ब्रह्मरूपेण विराजमानायां भगवत्याः कालिकायाः स्वरूपं ब्रह्मविष्णुमहेश्वराश्च सम्यक् ज्ञातुमसमर्थाः केवलां स्तुतिं कुर्वन्ति । एकदा भगवती काली शिवस्य वक्षस्थले पादंविन्यस्य स्वस्याः सर्वोपरि विराजमानत्वं प्रकटयामास । तथाहि अद्भुतरामायणे एका कथाऽस्ति । रामो रावण वधानन्तरमयोध्यायांसीतया सह राजसिंहासनमध्युष्य सुग्रीवहनुमदादिभिर्भरतादिभ्रातृभिश्च सह वार्तालापं कुर्वन्नासीत् । तदा रामगुणान् वर्णयन्तः सभासद ऊचुः – अतुलनीय शक्तिसम्पन्न हे राम ! लोकत्रयविजेतारं दुर्जयमपि लोककण्टकं दशवदनं रावणं हतवता भवता महाँल्लोकोपकारः कृत इति । तच्छ्रुत्वा सीतासस्मितमुवाच– मम बाल्यसमये पितुः प्रासादे एकोऽतिथिरागत आसीत् । सोऽकथयत् यत्-सुमालीनाम्नो राक्षसस्य पुत्री मुनेर्विश्रवसः पत्नी पुत्रद्वयं जनयामास । तयो रेकः सहस्रवदनोऽपरो दशवदनश्चास्ताम् । अनुजो दशवदनो रावणः कुबेरनिर्मितां लङ्कामधिवसतिस्म । अग्रजः सहस्रवदनो रावणोऽधुनापुष्करद्वीपे राज्यं करोति, तं कोऽपि जेतुं न शक्नोतीति । तच्छ्रुत्वोद्दीपितो रामः सद्य एवा ज्ञापयामास–युद्धसामग्र्यः सज्जीक्रियन्ताम्, स्व एव तं जेतुं पुष्करद्वीपं प्रति गन्तव्यम् इति । राजाज्ञानुसारेण सर्वाः सेना भरतसुग्रीवहनुमदादश्च सर्वे युद्धसामग्र्या सह पुष्करद्वीपं प्राप्ताः । रामोऽपिसीतया सह पुष्पकविमानेन तत्र प्राप्तः सन् युद्धाया-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ह्वयतेस्म । प्रथममुभयोः सेनानामेव युद्धं बभूव । ततः सहस्रवदनस्य वायव्यास्त्रेण क्षिप्ता भरतसुग्रीवादयः सेनाश्चसर्वा अयोध्यामेव प्रापिताः । केवलं सीतारामौ पुष्पकविमानेऽवशिष्टौ । ततो रामः सीतां विमान एव संस्थाप्य क्रोधाविष्टः सन् धनुरादाय सहस्रवदनं रावणं हन्तुं प्रचलितः । किञ्चित्कालं युद्धानन्तरं तेन रामो मूर्छां गमितः । तद्दृष्ट्वा भगवती सीता महाकालीरूपं धृत्वा तं जघान । ततोऽपि महाकाल्याः कोपो नोपशशाम । नितरां क्रोधाविष्टा सा स्वसृष्टाभिर्योगिनीभिः सह युद्धभूमौ मृतानां मस्तकैः कन्दुकक्रीडां कर्तुमारेभे तस्याः कोपशान्तये देवैः स्तुतः शिवस्तत्रागत्य शवासनेन तस्थौ । क्रोधाविष्टा काली शिववक्षस्थलोपरि स्वपादं निधाय दृष्टवती । तत अहो शिव ! ! इत्युदीर्य ललज्जिह्वां निःसारितवती । ततो लज्जया क्रोधः शशाम । ततः प्राकृतिकरूपं बिभ्रतीं तां ब्रह्मादयोदेवास्तुष्टुवुः । ततो रामोऽपि व्युत्थाय दृष्टवान् यत् सहस्रवदनो रावणो मृतोऽस्ति, सीता च स्वस्था विमाने वर्तते इत्यादि ।

अतो महाकाली परिपूर्णब्रह्मरूपतया सर्वाधिकशक्तिशालिनीत्यवगन्तव्यम् । "नित्यैव सा जगन्मूर्ति स्तया सर्वमिदं ततम्" ब्रह्मरूपिण्या तया निखिलं भुवनं व्याप्तमस्ति । " देव्या यया तत मिदं जगदात्मशक्त्या" (सप्तशती)

भगवान् विष्णुरपि प्रलयान्ते निद्रारूपया महाकाल्या वशीभूतः क्षीरसागरे शेषशयने शेतेस्म । ब्रह्मणास्तुता भगवती काली विष्णो निद्रां गृहीतवती तत उत्थाय विष्णु र्मधुकैटभौ जघान । ब्रह्मस्तुतौ भगवत्या कालिकाया ओङ्कार रूपता प्रदर्शिताऽस्ति यथा - "सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता अर्धमात्रास्थिता नित्यायाऽनुच्चार्या विशेषतः,,

प्रणवार्थः

अ उ म् इत्यक्षरत्रयेण ओम् शब्दो निष्पद्यते । जाग्रदवस्था तदभिमानवती विश्वरूपा, समस्टिरुपेण विराड्रूपा च सा प्रणवस्य प्रथमामात्राऽकाररूपा, स्वप्नावस्था भिमानेन संवव्यष्टिदृष्टया तैजसरूपा समष्टि दृष्टया हिरण्यगर्भरूपा चोच्यते । सुषुप्त्यवस्था भिमानेन व्यष्टिदृष्टया प्राज्ञरूपाऽपि समष्टिदृष्टया ईश्वरीरूपा च सैव भगवती कथ्यते । संक्षेपेण भगवती काली अवस्थात्रयाभिमानेन विश्वतैजसप्राज्ञरूपा विराड् हिरण्यगर्भेश्वरीरूपा च वर्तते । अतः सृष्टौ सर्वत्र सैव व्याप्ताऽस्ति । वस्तुतस्तु रहस्यरूपेण विचार्यमाणे भगवती काली नावस्थात्रयरूपा न वा तदभिमानिनी, यतोऽवस्थात्रयं मिथ्येत्यवगन्तव्यम् - तत्र प्रमाणम् - " त्रय आवसथा स्त्रयः स्वप्नाः (बृहदारण्यकोपनिषद्) अर्थः - त्रिरूः एवावस्था भगवत्या निवासस्थानम्, तथापि तिरूः एवावस्थाः स्वप्नरूपाः,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत एव मिथ्या इति । अतो मिथ्या भूतास्ववस्थासु भगवत्या न यथार्थरूपेण निवासः । तर्हि भगवत्या यथार्थस्वरूपं किमिति चेदुच्यते- "अर्धमात्रा स्थिता नित्या याऽनुच्चार्या विशेषतः" । भगवती महाकाली प्रणवस्यार्धमात्रारूपेण स्थिताऽस्ति, अर्धमात्रा नाम अवस्थात्रयातीतं तुरीयस्वरूपं कथ्यते । तुरीय स्वरूपं तु परिपूर्णं ब्रह्मस्वरूपमेव । अत एव सा ब्रह्मस्वरूपिणीति कथ्यते । ब्रह्मज्ञास्तु भगवत्या महाकाल्याः स्वरूपं स्वात्मा भिन्नं ब्रह्मैवेत्यव गच्छन्ति ।

सिद्धकाली तथा गुह्यकाली

भगवती काली भक्तजनानां मनोवाञ्छासाधनाय सिद्धिकालीनाम्ना विख्याताऽस्ति । भगवतीकाली शत्रु संहारसमये विकराल वन्हिज्वाला सदृशीं लपलपायमानां जिह्वां निःसार्य भयङ्कररूपा भवति । तदा तस्या भयावहं वदनं द्रष्टुं केऽपि न शक्नुवन्ति । असाधितशक्तिसम्पन्नाया विकरालरूपाया तस्याः पुरतः स्थातु महिषासुर प्रभृतयो बलवन्तो दानवा अपि न शक्नुवन्ति । भक्तजनाश्च भगवत्याः कालिकाया विकराल मुखं द्रष्टुमशक्नुवन्तः केवलं पादयोरेव दर्शनं कुर्वन्ति । नेपालराज्यस्य गोरखास्थाने पञ्चश्रीकमहाराजाधिराज – पृथ्वीनारायणशाहाद्यपर्यन्त शाहवंशीय नेपालनरेशाणामिष्टसिद्धिकारिणी इष्टदेवतारूपा भगवती काली गोरक्षकाली नाम्ना विराजते । तत्र तस्या मन्दिरं सुमनोहरमस्ति । तन्मूर्तिः प्रत्यक्षरूपेण द्रष्टुं न शक्यते । अतो भक्ता मन्दिरस्य द्वारप्रदेश एव बलिपुष्पोपहाराद्येकमर्पयन्ति । पूजकोऽपि संवत्सरस्यैकवारं कालिकाया मुखमदृष्ट्वैव नवानवस्त्रं परिधापयति । पादयोर्नखा वर्धन्ते, अतः पूजका नखा निकृन्ततीत्यपि श्रूयते । कालिकायाः सौम्यमूर्तिः सिद्धि कालीति कथ्यते । सिद्धकाल्या मन्दिरमपि काष्ठमण्डपा दक्षिणदिशि खोकनाग्रामसमीपे वाग्मत्यास्तटे विद्यते । भाजपुरमण्डले च प्रसिद्धं सिद्धकाली मन्दिरमस्तीति श्रूयते ।

बहून्देशांस्तदाधिपांश्च विजित्य स्वराज्यविस्तारं चिकीर्षन्तो महत्वाकांक्षासनाथा भूपतयः पुष्यनक्षत्रादिसिद्धियोगे निजखड्ग कालिकामावाह्य खड्गसिद्धिं कुर्वन्ति । श्री ५ पृथ्वीनारायणनृपेणापि खड्गसिद्धिः कृताऽऽसीदिति तदितिहासतो ज्ञायते ।

गुह्यकाली

कलियुगस्य भक्ता मम विकरालं रूपं द्रष्टुं नशक्नुवन्ति । अतो निज भक्तानां नृपाणां प्रजानां च कार्यं सिध्यतु इति दयां कृत्वा भगवती काली राज्ञां खड्गे भूमौ च गुप्तरूपेण वर्तते । अत एव गुह्यकाली (गुह्या गुप्ता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चासौ काली) इति तस्या नाम सार्थकमस्ति । भक्तानां हृदये सूक्ष्मरूपेण (साक्षिरुपेण) सैवकाली विराजते । भूमावपि कुत्रचित् भगवती काली गुप्तरूपेण तिष्ठति । काष्ठमण्डपे पशुपतिनाथमन्दिरस्य निकटे वाग्मत्यास्तटे गुह्यकालीमन्दिरमस्ति । तत्र मूर्ति र्न दृश्यते । मूर्ति स्तु भूमौ गुप्तरूपेण वर्तते केवलमेकं कुण्डं दृश्यते तत्र । तस्मिन्कुण्डे एव भक्ताः पूजोपहारादिक मर्पयन्ति नमन्ति च । अत एव भगवता शंकराचार्येण गुह्यकालीस्तुता वुक्तं यत् त्रियुगेषु त्वं सिद्धि कराली तिष्ये ख्याता गुह्यकाली ।
वेत्ति नचायं त्वामहिमाली विख्याताऽत स्ते महिमाली ।। इति ।

वस्तुतः कोशे यथा जाज्वल्यमानः खड्गो गुप्त रूपेण तिष्ठति तथैव भगवती काली अन्नमयादि पन्चकोशेषु अन्तः सर्वेषामात्मरूपेण विराजते " तं दुर्दर्शं गूढ मनुप्रविष्टम् " इत्यादि श्रुत्या पन्चकोशान्तर्गुप्तरूपेण स्थितं चैतन्य-ज्योति रेवात्मेति प्रतिपादितमस्ति । पन्चकोशाभ्यन्तरे गुप्तरूपेण वर्तमाना मात्मस्वरूपिणीं भगवतीं गुह्यकालीं साधारणजना ज्ञातुं प्रत्यक्षीकर्तुं च न शक्नुवन्ति ।

महालक्ष्मी

महिषोपद्रवशमनाय देवैः स्तुता जगज्जननी ब्रह्मविष्णुमहेशानामिन्द्रादि देवानाञ्च तेजो राशिभिः समुद्भूता समस्तदेवानां समष्टिशक्तिरूपाऽष्टादश-भिर्भुजैस्तत्तदायुधानि जपमालां कमलं सुरापात्रादिकञ्च विभ्रती लोहितवर्णा महालक्ष्मी रिति संज्ञया सैव ब्रह्मस्वरूपिणी भगवती स्तूयते । महिषो नाम उपद्रवकारी सर्वानर्थप्रदाता अहंकारविशेषो महाशत्रुरूपेण बहि र्दृश्यमानोऽप्य-न्तः शिवांशेनावतरितीभगवत्या दुर्गाया भक्त एवासीत् । अतः स्वहस्तेनैव तं निर्जित्य तस्य स्वपादमूले ऽवस्थितिं चोपकल्प्य सर्वोपरितने निरतिशयानन्दरूपे ब्रह्मस्वरूपे रममाणा महिषमर्दिनीति संज्ञया सुप्रसिद्धा भगवती महालक्ष्मीः सर्वा-नानन्दयति । शक्रादिभिः सुरगणैः स्तुता साऽस्माभिश्च स्तुता पूजिता कीर्तीता चास्मभ्यं कल्याणं वितरति ।

महासरस्वती

पुनः शुम्भ निशुम्भोपद्रव पीडितैरमरै र्विविधरुपेण सभक्ति स्तुता सती भक्तजनभद्रजननी जगज्जननी जगन्माता सच्चिदानन्दस्वरुपिणी भगवती अम्बि-कारुपेण प्रादुर्बभूव । तस्या एव शरीरकोशान्निःसृता कौशिकी देवी गंगारुपेण

Jayatu Sanskritam, Kathmandu; Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रवहति । तस्या एव क्रोधमूर्तिः करालरूपा काली अधुनाऽपि हिमालयपर्वते (जनकपुराञ्चलस्य दोलखा समीपे कालिञ्चोकपर्वते विराजमानाऽस्ति । सैवाम्बिका सातिशयसुन्दरं सारस्वतं स्वरूपं बिभ्राणा महासरस्वतीति भक्तजनैः स्तूयते । अष्टभुजा सा लोकोपद्रवकारिणा वहङ्कारदृप्तावसुरौ शुम्भनिशुम्भौ निहत्य सर्वत्र शान्तिप्रदायिनी शुम्भनिशुम्भमर्दिनीति निगद्यते ।

भगवत्याः पराम्बिकाया लोकोपद्रवप्रशमनायेत्थमवतारत्रयचर्चा दुर्गासप्तशत्यां प्राप्यते । एकैव चिद्रूपिणी भगवती दुष्टदुरुद्योगदमनपूर्वकं लोकोपकृतये नानारूपं बिभर्ति ।

त्रिधा विद्या

विद्यादृष्ट्या शक्तिरूपाया देव्यास्त्रिधा भेदो दृश्यते यथा (१) महाविद्या (२) सिद्धविद्या (३) क्षुद्रविद्या चेति । कुब्जा कर्णपिशाचीप्रभृतयो देव्यः क्षुद्रविद्याः कथ्यन्ते । ता अल्पकालिक क्षुद्रसिद्धिप्रदा न तु मोक्षप्रदानसमर्था भवन्ति । अल्पश्रमेणाल्पकालेन च क्षुद्राविद्याः साधयितुं शक्यन्ते । तदुपरि दुर्गा कुमारी प्रभृतयः सिद्धविद्याः सन्ति, ताश्चिरकालोपासनेन भक्तेभ्य ऐहलौकिकसिद्धिं ददति न तु मोक्षम् ।

महाविद्यास्तु चिरकालपर्यन्तं महताऽऽयासेन पूजोपासनाभ्यामनन्य भक्त्या च सेविताः सत्यो निष्कामोपासकेभ्यो मोक्षं सकामोपासकेभ्यो राज्यादि भोगं च प्रदातुं समर्थाः, यथा सुरथो नाम राजा समाधि र्नाम वैश्यश्च समानरूपेणैव भगवत्याः पूजोपासनस्तवादिकं चक्रतुः । किन्तु भोगेच्छासनाथाय च्युतराज्याय सुदर्शनाय भूपतये पूजोपासनादिना प्रसन्नाभगवती स्वराज्यलाभं जन्मान्तरे सावर्णिनामाष्टम मनुपदवीं च प्रददौ । सैव भगवती निष्कामाय विरक्ताय मोक्षकामाय वैश्याय मोक्षसाधनी भूतं ज्ञानप्राप्तिरूपं वरं ददौ । अतो भोगमोक्षप्रदानसमर्थाः महाविद्यारूपा देव्यवताराः सन्ति । ताश्च महाविद्या दशविधाः सन्ति यथा (१) त्रिपुरसुन्दरी (२) दक्षिणकाली (३) नीलसरस्वती (४) भुवनेश्वरी (५) कमला (६) बगला (७) धूमावती (८) मातङ्गिनी (९) भैरवी (१०) छिन्नमस्ता इति ।

त्रिपुरा

दशमहाविद्यासु भगवत्याश्चितरूपाया स्त्रिपुराया उपासनं परममङ्गलायनं भक्तजनमनोवाञ्छापूरणं सुरदुर्लभ मुक्तिप्रदञ्च विद्यते । षोडशवर्षा मनोहरा लङ्करणाद्युपकरण–महोज्वलवेषा सर्वातिशय–सौन्दर्यसनाथा भगवती त्रिपुरा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समुपास्यते जितेन्द्रियै भक्तजनैः । त्रिपुरारहस्यनामकं द्वादशसहस्र–श्लोकात्मकं शाक्ततन्त्रेषु मूर्धन्यं हारितायनमुनि विरचितं तन्त्रशास्त्रमस्ति । तत्र महात्म्य-खण्डं, चर्याखण्डं ज्ञानखण्डं चेति खण्डत्रयं विद्यते । तन्त्रशास्त्रमैश्वर्यादि भोगो-पायं मोक्षोपायं च दर्शयति । ज्ञानेन मोक्षप्राप्तिरेव मुख्यः पुरुषार्थः । ज्ञानप्रा-प्तये त्रिपुरायाः स्वरूपं यथा– त्रिपुरशब्देन जाग्रत्स्वप्नसुषुप्त्याख्या स्तिस्रोऽवस्था गृह्यन्ते, तासां प्रकाशिका पराचितिरेव त्रिपुरायाः स्वरुपम् । ज्ञातृ–ज्ञान–ज्ञेयात्मक–त्रिपुटीप्रकाशकं ज्ञानापरपर्यायं शुद्धचैतन्यमेव त्रिपुरा कथ्यते । सच्चिदा-नन्दरूपतया निराकाराऽपि भगवती त्रिपुरा भक्तानुग्रहायसाकाराऽपि भवति । त्रिपुरातत्त्वमत्र वर्णित मिति ग्रन्थस्य नामापि त्रिपुरारहस्यमिति कृतम् । पर-शुरामेण द्वादशवत्सरान् त्रिपुराया उपासनांकृत्वा तस्या अनुग्रहेण ज्ञानं लब्धम् । एवं कालीतारा प्रभृतीनां देवीनां वास्तविक स्वरूपं चैतन्यमेवेति नात्र विवादावसरः ।

केनोपनिषदः संक्षिप्ताशयो यथा– ब्रह्मैव सर्वशक्तिमत् । वन्हिवायुश-क्रादिषु या शक्तिरस्ति सा ब्रह्मण एव शक्ति रितिबोध्यम् । ब्रह्मणा (भगवत्या उमया) शक्तौ गृहीतायामग्निर्वायुः शक्रो वा न किञ्चित्कर्तु शक्नोति । ब्रह्मण एव शक्तिमवसाद्य देवा अपि स्वस्वकार्यसञ्चालनसमर्थाः सन्ति । अतो ममैव विजयः, ममैव विजय इत्यहंकारो न ग्राह्यः । हैमवती उमा ब्रह्मस्वरूपिणी एवेति ज्ञातव्यम् इति ।

गायत्री

गायत्री अपि ब्रह्मरूपैव । ब्राह्मणावेदमातरंशक्तिरूपां गायत्रीं प्रा–तर्मध्यान्हे सायंकाले च क्रमशो गायत्री-सावित्री सरस्वतीरूपेणोपासन्ते । विशे–षतो भगवती देवी तेजोरूपेणोपास्यते । 'तेजोऽसि शुक्रमसि' इत्यादि गाय–त्र्यावाहनमन्त्रेऽपि तेजो रूपत्वं प्रदर्शितमस्ति ।

आकाशस्या धिपो विष्णुर्जावनस्य गणाधिपः ।
वायोः सूर्यः क्षितेरीशस्तेजसो जगदम्बिका ॥

इत्यनुसारेणापि तेजसोऽधिपा जगदम्बिकेति ज्ञायते ।

पञ्चायतनेषु कः श्रेष्ठः ?

'गणेशो भास्करोदेवी शिवो विष्णुश्च पञ्चमः', इति पञ्चदेवेषु कः श्रेष्ठः, कश्चोपास्य इति बहूनां जिज्ञासा भवतीत्यत्र किञ्चिदुच्यते –सच्चि–

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दानन्दरूपस्य ब्रह्मण एव प्रतीका गणेशादय: पञ्चदेवता: । अतस्तेषु न न्यूनाधिकभाव: कार्य: । यथारुचि एक: सेव्य: । शंकराचार्यो ब्रह्मवादितया शक्तिं मिथ्यां मन्यमान स्तां नादरदृष्ट्या पश्यतिस्म । एकदा स काष्ठमण्ड – पादुत्तरदिशि साँखुनामकनगरात् वज्रयोगिनी नाम्नीं दशमहाविद्यास्वन्यतम वि – द्यारूपिणीं तारादेवीं द्रष्टुं पर्वतमार्गे आरोहन्नासीत् । आरोहणपरिश्रमेण श्रान्तः स तृषाकुलो जातः । तदैका वृद्धा नारी जलघटमादायारोहमाणा दृष्टा । तृषितः स तामगादीत्– मातः ! जलं किञ्चिद्देहि परिश्रान्तोऽहं शक्तिहीनो जात इति । सा ऽकथयत् – त्वंतु शक्तिं सत्यरूपां न मन्यसे । कथं तर्हि शक्तिहीनो जातो ऽसीति । तस्याः स्तद्वचनामृतं श्रुत्वा विशुद्धहृदयो भग– वाञ्छङ्कराचार्य स्तां जगज्जननीं शक्तिरूपां भगवतीं मत्वा तस्याः पादयोः पपात । तदैव तेन ' न मन्त्रं नो यन्त्रं ' इत्यादि श्लोकै स्तस्या स्तुतिः कृ– तेति किंवदन्ती श्रूयते । अतः पञ्चायतनेषु स्वरूच्यनुसारेण केचन गणेशं, केचन सूर्यं केचन शिवं, केचन विष्णुं केचन शक्तिरूपां जगदम्बिकामुपासन्ते । शक्तिरूपेणोपासनं सुकरं च भवति, यतो मातृ भक्तिः पुत्राणां सर्वेषां स्वा- भाविकी भवति । अतो बालकयुववृद्धानां सर्वेषामेव मातृरूपेण भगवत्या देव्याः श्रद्धया प्रेम्णा ऽनन्यरूपेण सेवा कार्या । शरणागत– वत्सलायां तस्या– मेव शरणागतिः कार्या । लोके बहवो जनाः शक्तिरूपां तां भजन्तो दृश्यन्ते । ब्रह्मपरायणा ब्राह्मणा अपि शक्तिरूपामेव गायत्रीं वेदमातरमुपासते अतएव श्रूयतेयत्- सर्वे शाक्ता द्विजाः प्रोक्ता न शैवा न च वैष्णवाः आदिशक्ति मुपासन्ते गायत्रीं वेदमातरमिति ।

सगुण- निर्गुण-स्वरूपम्

भगवत्याः स्वरूपं सगुणं वा निर्गुणमित्यत्र देवी भागवते कथितं यत्–

सगुणा निर्गुणा चेति द्विधा सा परिकीर्तिता ।
सगुणा रागिभिः सेव्या निर्गुणा तु विरागिभिरिति ।

भगवत्याः कालिकाया द्वे रूपे सगुणं निर्गुणं चे ति । देहाभिमानवन्तः पुण्यात्मानो भक्ताः कठिनेन तपसा भगवत्या देव्याः सगुणस्वरूपस्य दर्शनं प्राप्नु– वन्ति । तस्या अनुग्रहेण तेषां मनः कामना प्रपूर्यते । सुरथनृपेण भगवत्याः सगुण स्वरूपाया दर्शनं प्राप्तमासीत् । एकशताब्दी पूर्वं पश्चिमवङ्गे जनिमता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रामकृष्णपरहंसेन भगवत्या मातुः कालिकायाः प्रत्यक्षदर्शनं प्राप्तमिति श्रूयते।

देहाभिमानरहिता ज्ञानिनो भक्ता ज्ञाननिष्ठारूपया निर्गुणभक्त्या निर्विकल्पसमाधौ आत्मैक्यरूपेण भगवत्या निर्गुणस्वरूपस्य प्रत्यक्षदर्शनं (प्रत्यक्षानुभवरूपं साक्षात्कारम्) कुर्वन्ति। भगवत्या निर्गुणस्वरूपं नाम मायारहितं ब्रह्मैव। अतएव भगवतीं ब्रह्मस्वरूपिणीतिकथयन्ति। यावत् सगुणस्वरूपं स्वीक्रियते तावत् स्त्री पुरुषः अथवा प्रकृतिः पुरुष इति भेदो भवति। निर्गुणस्वरूपे प्राप्ते तु न स्त्री पुं भिदाऽस्ति। अतो विवेकवैराग्ययुतैर्ज्ञानिभिर्ज्ञानपूर्वकं निर्गुणस्वरुपमेव धार्यम्। निष्कामकर्मणः सगुणभक्तेश्च फलेन मनसो बुद्धेश्च प्रकाशकं साक्षिचैतन्यमेव मत्स्वरूपमिति ज्ञातुं शक्यते। ईश्वर एव सर्वेषां हृदये साक्षिरुपेण तिष्ठति। साक्षी एव समष्टिकोटौ ईश्वर इति कथ्यते। अतः साक्षी आत्मैवेश्वरः। शक्त्युपासकैर्ज्ञातव्यं यत् साक्षिस्वरुपिणी भगवती काली मम (आत्मनः) स्वरुपभूतास्ति। अत आत्मरुपतया अहमेवेश्वरी भगवतीब्रह्मरुपादेवी अस्मि इत्यभेदेनोपासनीया मुमुक्षुभिः।

निष्कामकर्मणा निष्काम भक्त्या च सम्यक् चित्ते विशुद्धे केवलसत्वगुणसनाथेन चित्तेन 'अहमेव चित्तिरुपा भगवतीकाली'ति सविकल्पसमाधिद्वारा निरन्तरमनुभवः कार्यः। सुषुप्तिकालेसकलकार्यजाते विलीनेसति भोक्तुः साक्षी प्राज्ञ एवाहमस्मीति जाग्रत्काले निरन्तरमनुभवः कार्यः। एतेन जगद्वासना विनश्यति ततो निर्विकल्पसमाधेर्योग्यता जायते। तदा श्रीमातुरनुग्रहेण महावाक्यार्थबोधपूर्वकं वृत्तिरहितायां (विकल्परहितायां) बुद्धौब्रह्मात्मैक्यबोधः समुदेति। अनेन चरमज्ञानेन अज्ञानं नश्यति। साधकः स्वयमद्वितीय ब्रह्मरुपेण विराजते। निर्गुणोपासनायाः फलं ब्रह्मसाक्षात्कारः। देवीभागवतानुसारेण वैराग्यवन्तो देहाभिमानरहिता निष्कामाभक्ता भगवत्या निर्गुणस्वरुपं स्वात्माऽभिन्नत्वेनोपासते। देहाभिमानवन्तः सकामा भक्तास्तु सगुणस्वरुपां भगवतीमुपासते

शिवे शक्तौ च भेदो नास्ति

ब्रह्मस्वरुपिणी भगवती जगत्सर्गकाले ब्रह्मविष्णुशिवरूपं धृत्वा स्वयमेवतेषां शक्तिरुपेण सरस्वती लक्ष्मी पार्वती सम्पन्ना। यथा वन्हौ तद्दाहकशक्तौ च भेदो नास्ति तथैव शिवे शक्तौ च भेदो नास्ति। अत एव देवीस्तुतौ शंकराचार्य उक्तवान्–शिवेनसाकं नहिते भेदः इति

तत्त्वम्

देवीतत्त्वविषये भगवान्छङ्कराचार्यो गुह्यकालीस्तुतावकथयत्–

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निरवधिचेतसि वससि ममत्वं
किमिति निकृन्तसि नैव ममत्वम् ।
रूढपदं हृदि यदि तत् क्व त्वं
तदपगमे सति भवती तत्त्वम् इति ॥

अर्थः– हेभगवति ? निरवधि–निरन्तरम् । मम चेतसि–चित्ते । त्वं वससि चेत् किमिति किमर्थं, ममत्वं– ममभावं नैव निकृन्तसि–न छिनत्सि ? यदि तत्–ममत्वं,हृदि-चित्ते रुढपदं-दृढरुपेण स्थितं चेत्,त्वं क्व? कुत्रासी? अर्थात् न कुत्रापि त्वं लभ्यसे। तस्य ममत्वस्य अपगमो नाशं स्तस्मिन्सति,भवती त्वं (भगवती) तत्वं–यथार्थस्वरुपं (भवसि)।

व्याख्या–आत्मा खलु मनसो बुद्धेश्च साक्षी, अतोऽस्माकं स्वरुपे ममत्व न स्थातुं पारयति । चित्त त्रिगुणात्मकम् तस्य तमोंशे पदार्थाजायन्ते । चित्तस्य स्वच्छत्वा त्सात्विकांशे साक्षी आत्मा प्रतिविम्बितो भवति । आत्मनः प्रतिम्बोऽहकार इत्युच्यत । स चित्तस्य राजसिकवृत्तिद्वारा तमोवृत्तिस्थितपदार्थेन सह सबन्धं स्थापयति । सम्बन्धोऽयं ममतेति कथ्यते । इत्थं साक्षिचैतन्यं चित्ते प्रतिविम्बितं सत्अहं (अहंकारः) भवति । चित्तस्य तमोंशे जायमानः पदार्थो मम भवति ।

इत्थमहंकार श्चित्तस्य तमो भागे जायमानं पदार्थं ममे ति मन्यते । इत्थ म–हन्तां ममतां चादाय जावः संसारी भवति । निजयथार्थ स्वरुपस्याज्ञानमेवा–ज्ञानं कथ्यत । एतेना ज्ञानजनितभ्रमेण जीवो बद्धो भवति ।

भगवान् बालशङ्कराचार्यो ऽस्मिञ्ल्छोके कथयति हेमातः ! त्वं शुद्धचितिरुपा ब्रह्मस्वरूपिण्यसि । त्वमेव साक्षिणी भूत्वा ममहृदये निवससि । श्रुतिरपि कथयति ' तत्सृष्ट्वा तदेव प्रविशत् , इति ब्रह्मैव जगत् सृष्ट्वा तत्रात्मस्वरुपेण स्वयमेव प्राविश दिति श्रुते रर्थः । अतः हे मात ! त्वा मात्मासि । चित्तवृत्तिरूप पदार्थानां मिथ्यात्वेन तत्स्वरूपस्यात्मनो मिथ्यापदार्थेन सह ममतारुपः सबन्धो भवितुं नशक्नोति । आत्मनः सत्यत्वात् पदार्थानां मिथ्यात्वाच्च मरीचिकोदकवद् भ्रमेण दृष्टा अपि पदार्था न सत्याः । सद्वस्तुनोऽसद्वस्तुना सह संबन्धो भ्रमेणैवा भ्युपेयते । हे मातः ? यदि भवती आत्मरूपेण मम हृदये स्थिताऽसि तर्हि स आत्मा ममैव स्वरूपमिति मत्स्वरुपे न ममता भवितु मर्हति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यदि कस्य चिच्चित्ते ममता दृढरुपेण स्थिताऽस्ति चेत् स न भगवत्या यथार्थ भक्तः (न ज्ञानी भक्तः) यथार्थं भक्तः (उत्तमं भक्तः) तु भगवतीं स्वस्यैवात्मस्वरुपिणीं जानाति । स हृदये ममतोत्थानावसर मदत्वा शान्तः सन् वसति ।

तत्त्वज्ञानोपायं वदति भगवाञ्छङ्कराचार्यः – तदपगमे सति भवती तत्त्वम् इति । तदपगमे सति=ममतानाशे सति, भवती=ब्रह्म । तत्त्वं=यथार्थ स्वस्वरुपं भवति ।

ममतायां विनष्टायां तत्त्वमस्यादि महावाक्यसहकारेण साक्षिरूपस्यात्मनो ब्रह्मचैतन्येन सह एकतारूपः सक्षात्कारो भवत्येव ।

चित्तेन सह मम संबन्धो नास्तीति ज्ञातुं सुषुप्तावनु भूतस्य स्वस्वरुपस्य सम्यक् स्मरणं कर्तव्यम् । सुषुप्तौ न चित्त मवतिष्ठते । अतः कार्या भावात् कारणरुपेणस्वीकृत मज्ञानमपि तदा स्थातुं न पारयति । अत एव श्रुता वुक्तम् – "सत्सम्पन्नो भवति, स्वमपीतो भवति" इति । सुषुप्तिसमये मनुष्यः (जीवः) सता ब्रह्मणा सहै क्यमाप्नोति, तदाऽहङ्कारोपि विलीयते एतस्या उत्तमायाः सुषुप्ति स्थितेः स्मरणं यदि जाग्रति क्रियते तदाऽहन्ताममते उभे एव नश्यतः । ततो महावाक्यं तं बोधयति "तत्त्वमसि" (त्वं ब्रह्मासि) इति । एतन्महावाक्यानुस्मरणात् साधकस्य चित्तं सर्ववृत्तिरहितं (अहन्ताममतारहितम्) भवति । एषा चित्तस्या खण्डाकारवृत्ति रथवा निर्विकल्पसमधि रुच्यते । अत्र स्फुटो ब्रह्मस्वरुपानुभवो भवति । अखण्डाकार वृत्ते रुत्पत्ति रेव ज्ञानोत्पत्तिः कथ्यते । ज्ञानोत्पत्तौ सत्या मज्ञानं विनश्यति ततः कारणाभावा त्पुन रहंमम भवोदयो न भवति । अखण्डाकारवृत्ति रुपं ज्ञान मज्ञानं विनाश्य सा वृत्ति र्जलं स्वच्छीकृत्य कतकरेणु रिव स्वयं नश्यति, न तस्या नाशाय व्यापारान्तरापेक्षा । ततश्चित्त्यारिशेष्यं भवति अर्थात् अद्वितीय ब्रह्मस्वरुप मवशिष्यते । इत्थं देवीतत्वस्यानुसन्धानेकृते अन्ततो ब्रह्मज्ञानोत्पत्तिपूर्वकं मोक्षः सिध्यति ।

o–o–o

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वैताद्वैताद्यभेदः

दामोदर शर्मा सह प्राध्यापकः
जतता विद्यापीठम्

कथं परमनिःश्रेयसं प्राप्तं स्यात् ? इत्युद्दिश्य षड् दर्शनानि प्रवृत्तानि साङ्ख्ययोग न्याय वैशेषिक पूर्वमिमांसोत्तरमीमांसाख्यानि । तत्रान्तिमदर्शनं मद्वैत-मतावलम्बि तदन्यदर्शनानि द्वैतमतावलम्बीनि विद्यन्ते । तानिसर्वाण्यपि दर्शनानि वेदाविरुद्धानि वेदोद्भूतानि च सन्ति । अतस्तानि सर्वाण्यपि दर्शनानि आस्तिकदर्श—नानि मन्यन्ते । न ईश्वरास्वीकर्तृत्वं नास्तिकत्वम् येन साङ्ख्य पूर्वमीमांसादर्शने नास्तिकदर्शनेस्याताम्,किन्तु वेदप्रामाण्यास्वीकर्तृत्वंनास्तिकत्वम्, वेदप्रामाण्यं च साङ्ख्यपूर्वमीमांसादर्शनाभ्यामपि स्वीक्रियते इतितयोरप्यास्तिकदर्शनत्वम् । वेदप्रा—माण्य स्वीकर्तृषु वेदवाक्यान्येव प्रमाणतया प्रदर्शयत्सु दर्शनेषु मध्ये केषाञ्चित् प्रामाण्यं केषाञ्चिदप्रामाण्यम् इति दुर्वचम् , विनिगमकाभावात् सर्वेषामेव प्रा-माण्यं सर्वेषामेवाप्रामाण्यं वा वक्तव्यम् । अस्माभिर्वेदप्रामाण्यस्वीकर्तृभि र्वेदप्रा-माण्यस्वीकर्तृणां दर्शनानामप्रामाण्यं दुर्वचमिति सर्वेषामेव तेषां दर्शनानां प्रा-माण्यं वक्तव्यम् । परस्परविरुद्धोभयं च प्रमाणयितुं नशक्यमिति द्वैताद्वैतयोरभे-द आवश्यकः ।

तत्र द्वैतं नाम सजातीय विजातीय स्वगतभेदप्रतियोगि , अद्वैतं नाम च तादृश-भेदाप्रतियोगि तत्र सजातीयविजातीय शब्दार्थौ स्पष्टावेव विद्येते , स्वशब्दा-र्थोऽस्ति स्वीयः,स्वीयत्वं च स्वावयवेषु स्वस्मिन् विद्यमानेषु गुणकर्मादिषु च विव-क्षितम्, गतशब्दार्थोऽस्ति विद्यमानः । न्यायादिमतेषु एव सजातीयात्मान्तर वि-जातीय पृथिव्यादि स्वीय गुणादिनिष्टभेदप्रतियोगित्वरूपं द्वैतत्वमात्मन्युपपन्नम् अद्वैतवेदान्तमते ब्रह्मेतरद् वस्तुतः किमपि नास्ति,तदेव ब्रह्म आत्मा,जीवोऽप्यात्मै-व किन्तु स ब्रह्माभिन्न एव । यथोक्तम् —

ब्रह्म सत्यं जगन्मिथ्या जीवोब्रह्मैव नापरः , इति ।

तथा च वस्तुतस्तादृशप्रतियोगित्वं ब्रह्मणि नास्ति. प्रतीयमानं तादृशप्रतियोगित्वं तु व्यावहारिकम् इत्युक्तप्रतियोगित्वाभाव रूपमद्वैतत्व मात्मन्युपपन्नम् ।

अनयो द्वैताद्वैतयोरभेदः कथमित्यत्रोच्यते —

अद्वैतवेदान्तिभिः आदावन्ते च यन्नास्ति वर्तमानेऽपि नास्ति तत् इति स्वीकृत्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ब्रह्मातिरिक्तस्य सर्वस्याविद्यमानत्वं स्वीकृतम्, नैयायिकादिभिस्तु आदावन्ते च यन्नास्ति मध्ये तु दृश्यते तस्यापिविद्यमानत्वं स्वीकृतम्, तथा चैकमेव वस्तु कंश्चिद्विद्यमानं स्वीकृतमिति संज्ञाभेदमात्रं तु समजनि, न वस्तुभेदः । अतो द्वैताद्वैतविषयोद्देशेन दर्शनानां विवाद एव वस्तुतो नास्ति अत एव गरुडपुराणे लिखितम् –

'अद्वैतं केचिदिच्छन्ति द्वैतमिच्छन्ति चापरे ।
समं तत्त्वं नजानन्ति द्वैताद्वैतविवर्जितम् ।।'' इति ।
(१६ अध्यायस्य द्वानवतितमः श्लोकः)

अस्यार्थः – 'द्वैताद्वैतविषये दर्शनेषु विवादाभावेऽपि मूढा दार्शनिकास्तत्रैव विषये विवादं कुर्वन्ति, नाममात्रभिन्नतया द्वैताद्वैतविषयताटस्थ्यं वास्तविकं सर्वदर्शननिष्ठं नाववुध्यन्ते (द्वैताद्वैतदुराग्रहतो दूरीभूतमात्मतत्त्वं नावबुध्यन्ते' इति ।

यथा तस्यैव पद्यस्य पं श्री नौनिधिरामकृतायां संस्कृतटीकायां लिखितम् – केचित् = शङ्करानुयायिनः शैवाः स्वाभिमतेनाद्वैतमेव प्रतिपादयन्ति, अपरे = मध्वाद्यनुगा वैष्णवाभिमानिनो द्वैतं चेति, किन्तु द्वैताद्वैतमत दुराग्रहवर्जितं स्वानुभवगम्यं शिवमद्वैतं समं = सर्वमतानुस्यूतं न जानन्ति । तदुक्तं कुसुम-दर्शनेन –

''त्रयी साङ्ख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजु कुटिल नानापथ जुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव'' इव इति'' इति ।।

द्वैताद्वैतदुराग्रहवर्जितत्वे युक्तिरपि दृश्यते —
विष्णवादिभक्ताः सर्वेऽपि सन्मार्गस्थाएव । विष्णुभक्तो वा स्यात्तदन्य यत्किञ्चद्देवभक्तो वा स्यात् परमनिःश्रेयसंप्राप्तौ (विदेहमुक्तौ) बिशेषलेशतोऽपि शून्या समानैव गतिर्भवति समेषाम् । कथम्? । श्रूयताम्–
विष्णु भक्तो ऽन्ततो विष्णौ लीयते, इत्यस्यार्थो ऽति विष्णुसत्ता भिन्नसत्ताकतया न तिष्ठति इति । तथा च तस्य विष्णुभक्तस्य विष्णौ लयेन न विष्णुद्वयं जातम्, न विष्णुभिन्न स स्थितः नापि विष्णुरेव स जातः इति वक्तुं शक्यते, एकस्य विष्णोः प्रथमतोऽपि विद्यमानत्वादपरस्य विष्णोरि-दानीमप्यभावात् । तथा च 'तस्य मुक्तस्य सत्ता इदानीं न दृश्यते, इत्येव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वागतम् । इयमेव स्थितिः उक्तेनैव प्रकारेण शिवभक्तादीनामपि भवति । तथा च मुक्तौ समानैव समेषां विष्णुभक्तादीनां स्थितिः ' इति सिद्धौ विष्णु-भक्त्यादिमार्गाणां समानं सन्मार्गत्वं यथा, तथा षड्दर्शनदर्शितानां षण्णामपि मार्गाणां समानं सन्मार्गत्वम् । कथम् ? श्रूयताम्--

षड्दर्शन दर्शितमार्गषट्कमध्ये केनापि मार्गेणाविचलं चलताम, विदेहमुक्तौ विशेषलेशतो ऽपि शून्यासमानैव गतिर्भवति । कीदृशी ? तस्य मुक्तस्य सत्ता इदानीं न दृश्यते' इत्येतादृशी । स्थित्यन्तरतायां मुक्त-त्वस्यैवानुपपत्तेः । कथम् ? श्रूयताम्–

तत्सत्तायां दृश्यमानायां ' स सर्वं जानाति, स सर्वं पश्यति ' इत्या-दिकं वक्तव्यम्,तथा च हननादिकमग्निकुण्डदाहादिकं परेष्वपि पश्यतस्तस्य दुः-खोत्पत्तेर्न तस्य सर्वदुःखान्मुक्तिः ' तथा च कथं तस्य मुक्तत्वम् ? न च परदुःखदर्शनेऽपि दुःखोत्पत्तौ ईश्वरस्यापि दुःखित्वापत्तिरिति वाच्यम्, सर्वदर्शनाभावे दुःखित्वे चेश्वरत्वस्यैवानुपपत्तेस्तत्र सर्वद्रष्टृत्वेपि दुःखित्वा-भावात्, तस्येन्द्रजालिकसमानत्वादस्माकमतादृशत्वात् ।

तथा च द्वैतमार्गतो ऽद्वैतमार्गतो वा फले समाने द्वैतत्वाद्वैतत्व-दुराग्रहः कुतः ? द्वैतत्वाद्वैतत्वताटस्थ्यमेव समुचितम् इत्यनावश्यकद्वैतत्वा-द्वैतत्वदुराग्रहतो दूरीभूतमनौपाधिकं द्वैतत्वाद्वैतत्वयोरुभयत्रापि समं=पक्षपा-तशून्यं तत्त्वम्=आत्मतत्त्वं न जानन्तीत्युक्तम् ।

एतज्ज्ञानशून्यानसत्यपि विनिगमके 'इदं दर्शनं स्वच्छमिदं तु दर्शनं तुच्छम्, इति भ्रान्तान् जनान् लक्ष्यीकृत्योक्तं तत्रैव गरुडपुराणे तत्रैवाध्याये —

' षड् दर्शनमहाकूपे पतिताः पशवः खग ! ।
परमार्थं न जानन्ति पशुपाशनियन्त्रिताः ॥ इति ।

अस्य ' परमार्थवत्येव न तु परमार्थशून्ये षड्दर्शनरूप महाकूपे पतिता अपि पशुपाशनियन्त्रिताः=दर्शनेषूच्चावचभावभावनावन्तो मूढाः परमार्थं न जानन्ति, इत्यर्थः ।

केनापि दर्शनेन कस्यापि दर्शनस्यप्रमाणत्वमभिनीयेत, दार्शनिकाः कथं कथयन्ति ' इदं दर्शनं प्रमाणमिदं त्वप्रमाणम् ' इति ? । एतैरपि तथा ऽभिनीयते, इति वक्तुं न शक्यते, कस्यापि दर्शनस्याऽपठितारम-कस्मात् केवलं तादृशप्रष्टारं प्रति अभिनयस्याकर्तव्यत्वात् तादृशं प्रत्यपि तेषां तथोक्ते दृष्टत्वात् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतो विद्वद्भिः ' दर्शनेषु मध्ये इदं प्रमाणमिदमप्रमाणम् , द्वैतमेवोचितं नाद्वैतम् , इत्यादिभ्रमे न पतनीयम् । द्वैतत्वाद्वैतत्वप्रश्ने कृते निःसंकोचमुत्तरं देयम् –

'एकस्यामेव स्थितौ एकस्यैव वस्तुनो नाममात्रं भिन्नंभिन्नमुक्तमस्ति दर्शनेषु , तादृशस्थितौ द्वैतं वा वास्तविकमद्वैतं वा वास्तविकम्?'इति प्रश्न एव न तिष्ठति , यदा वास्तविकतयाऽवास्तविकतया चाशङ्कितमेकमेव वस्त्विति ज्ञातं तदा तादृशप्रश्नः कथं तिष्ठेत्?' इति ।

इदमुपलक्षणम् । सर्वत्रेयं स्थिति र्ज्ञातिव्या । यथा एकस्यामेव स्थितौ न्यायेन पिठरपाकसंज्ञा वैशेषिक दर्शनेन पीलुपाकसंज्ञा दत्ताऽस्ति, तत्र को वास्तविकत्वावास्तविकत्वविवादावसरः?. एकस्यामेव स्थितौ शब्दोपमानयो र्न्यायेन पृथक्प्रमाणसंज्ञा दत्ताऽस्ति वैशेषिकदर्शनेनानुमानान्तर्भूतत्वसंज्ञा दत्ताऽस्ति , तत्र कोऽनुमानपार्थक्यापार्थक्यविवादावसरः? । पार्थक्यं वा ऽपार्थक्यं वोच्येत, एकमेव वस्त्वस्ति तत्र ताटस्थ्यमालम्बनीयम् , पार्थक्यापार्थक्यदुराग्रहो वर्जनीयः। एवं च यदा सर्वेषु दर्शनेषु भिन्नाभिन्न विषयेषु नाममात्रभेदोऽस्ति, वस्त्वेकतया वास्तविको मतभेदो नास्ति, तदा को विवादावसरः? वस्त्वैक्याद्विवादं परित्यज्य ताटस्थ्यमवलम्ब्याग्रे सरणीयम् ।

एवं वेदस्य पौरुषेयत्वापौरुषेयत्वविषयमादाय निष्कारणमेव विवदमाना दृश्यन्ते विद्वांसः । को विवादः समानायां स्थितौ ? । पौरुषेयत्ववादिभिरपि नवीनवेदनिर्माणं न स्वीक्रियते,सर्वेषु कल्पेषु 'इषे त्वा इषे त्वोर्जे त्वा इत्यादिरेवास्तिवेद स्तदितरो नास्ति इति स्वीक्रियते, तादृशस्थितौ ईश्वरेण निर्मीयते इत्युच्येत आविर्भाव्यते इति वोच्येत स्थितावन्तरं नायाति ।

अपौरुषेत्ववादिभिरपि प्रलयेतिरो भूतो वेद : कल्पादावाविर्भवतीत्युच्यते, तत्र आविर्भवतीत्युच्येत उत्पद्यते इति वोच्येत स्थितावन्तरं नायाति । तिरोभूत इति वोच्येत नष्ट इति वोच्येत स्थितिरेकैवास्ति इति व्यर्थो विरोध ः।

एवं सत्कार्यवादासत्कार्यवादविषयमादायापिव्यर्थो विवादो दृश्यते विद्वत्सु सत्कार्यवादिनोऽपि 'तत्सत्कार्य समुद्भूतमेव दृश्यतेऽनुद्भूतं न दृश्यते,इति वदन्ति तथाऽनुक्त्वा किमुच्यताम् ? अन्या गतिरेव नास्ति । यदा सत्कार्यवादिभि र्न दृश्यते तदा ऽसत्कार्यवादिभिरपि न दृश्यते यदा तैः दृश्यते तदैभिरपि दृश्यते तथा च कार्यस्य सत्त्वं बोच्येतासत्त्वं वा , स्थितौ किमन्तरमागतम्?न किमपि व्यर्थं व्युद्यते विद्वद्भिः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ईश्वरास्तित्वनास्तित्वविवादोऽपि तादृश एवास्ति, अस्तित्ववादिभि र्मन्यते यद्भयाद्वाति वातोऽयं सूर्यस्तपति यद्भयात् तेनेश्वरेण जगदिदं निर्मितमस्ति, इति नास्तित्ववादिभिरपि प्रकृत्यैव जगदिदं निर्मितमस्ति इति तूच्यत एव, निष्कारणमेव निर्मितमस्ति' इति तु नोच्यते तथा च ईश्वरस्यैव प्रकृतिः इति नामान्तरी-करणमेव तु जातम् प्रकृत्या एव ईश्वर इति नामान्तरीकरणमे तु जातम्। वस्तुतत्त्वे समाने नामभेदेन किम्? नामानि त्वेकस्यैवानन्तानि भवितुं शक्नुवन्ति। अतः अद्वैतं द्वैतं वा सम्यक्? इति प्रश्ने कृते तयोरेकताऽस्ति सत्येव भेदे युक्तत्वायुक्तत्वविचारो युक्तः इत्युत्तरं देयम् इत्युक्तं।

एवं च स्फुटं विरुद्धतया प्रतिभासमानयो द्वैताद्वैतयो रेकता कथम्? इति प्रश्ने एकस्यैव कैश्चिद् द्वैतसंज्ञायाः कैश्चिदद्वैतसंज्ञयाः दत्तत्वात्। अतः

'अद्वैतद्वैतयोर्भेदोऽभेदो वाऽद्वैतद्वैतयोः।

इति ते संशयो मा भूदभेदोऽद्वैतद्वैतयोः इत्युत्तरं देयम्।

सत्कार्यवादासत्कार्यवादयोः कस्य युक्तता?' इति प्रश्ने कृते 'भिद्यते नाम मात्रं तु वस्तुभेदो न विद्यते।

युक्तायुक्तविचारोऽयं भावत्कस्तत्र नोचितः॥' इत्युत्तरं देयम्।

'ख्यातिपञ्चके कस्य युक्तता?', इति विद्वत्सकाशात् प्रश्ने आयाते आत्मख्याति रसत्ख्यातिरख्यातिः ख्यातिरन्यथा।

अनिर्वाच्या च वा ख्याति र्यथेच्छं भण्यतां जनैः॥
भ्रमे वस्तुनि भेदो न नाममात्रं तु भेदितम्।
युक्तायुक्तविचारोऽयं भावत्कस्तत्र नोचितः॥' इत्युत्तरं देयम्।

'पैलवे पैठरे पाके कः पक्षो युक्तिमत्तरः?' इति प्रश्ने कृते
'निरर्थोऽयं कृतः प्रश्नः समानायां स्थितौ त्वया।
स्थितौ न दृश्यते भेदश्चेद्विवादो निरर्थकः॥
स्थितौ चेद् दृश्यते भेदो दर्शनीयस्त्वया मयि।
न त्वया न मया नान्यै र्दृश्यते भिन्नता स्थितौ॥
व्यर्थो विवादो वर्जेत नाममात्र भिदाश्रयः।' इत्युत्तरं देयम्।
एवं रीत्या सर्वत्र उत्तराण्यूह्यानि।

ननु एकमपि वस्तु भिन्नं भिन्नं दृश्यते प्रभाभ्रमाभ्यां भिन्नभिन्नैः? इति चेत्, अल्पमिदमुक्तम्, एकेनापि खल्वेकमपि वस्तु प्रभाभ्रमाभ्यां भिन्नभिन्नं दृश्यते। अभ्रान्तस्थितिमादाय विचारणीयम्। अतोऽहं वच्मि:—

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कदाचिद् भिन्नभिन्नागन्तुकनिमित्तवशादेकत्रैव वस्तुनि भिन्नभिन्ना दृष्टि ज्रयेत, सा स्थितिः क्षणिका विद्यते, तादृशनिमित्तनासे यादृशं वस्तु सर्वैरपि तादृशमेन दृश्यते। स्वाभाविकी दृष्टिरेकस्मिन् वस्तुनि यदा सर्वेषां समानैवा-स्ति तदा द्वैताद्वैतत्वपौरुषेयत्वापौरुषेयत्वसत्कार्यवादासत्कार्यवादादिविवादो नाममात्रविवादो भवति, एकस्मिन् वस्तुनि स्वाभाविकी दृष्टि भिन्नानां भिन्नभिन्ना भवत्येव नहि।

तथा च वास्तविको विरोध एव नास्ति शास्त्रेषु, विरोधप्रदर्शनमिव यद् दृश्यते तत्तच्छास्त्रेषु, तत्तु मुक्तेस्तत्तन्मार्गाणां परिष्करधियैवाभिनीतमस्ति। वेदेष्वपि तत्तत्स्थलेषु तथा तथा वचनानि दृश्यन्ते, 'इत्थं मन्यतामित्थं वा मन्यताम्, वस्तुतत्त्वं त्वेकमेवास्तीति तादृशकथनस्य तात्पर्यम्। अतो द्वैताद्वै-ताद्यभेदः सिद्ध इति।

००००

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महाकविः सुकृतिस्तत्कृतिमितयश्च

भागवतप्रसादशर्मा
सहायकप्राध्यापकः

(महाकवेः सुकृतिदत्तस्य न काऽपि कृतिः प्रकाशनं प्राप्ता । केवलं काष्ठ-मण्डपस्थराष्ट्रियाभिलेखालये पञ्जीकृतां तत्कृतकार्तवीर्योदयमहाकाव्यस्य लिपिकारकृतपाठच्छेदाशुद्ध्यादिभिराकुलां पाण्डुलिपिं कविवरभरतराजपन्ततोऽधिगतां च तस्यैव काव्यस्यापरामांशिकीं पाण्डुलिपिमाधृत्य प्रस्तुतोऽयं लेखः कवेः कृतित्वं व्यक्तित्वं च सामग्र्येण प्रस्तोतुं शक्नोतीति न शक्यते वक्तुम् । परमस्मात् कवेरन्यासां कृतीनां गवेषणायां विदुषां यदि किञ्चित्कुतूहलमुदियात्तदैव सफलो यत्न इति मन्ये)

संस्कृतसाहित्यस्य प्रौढपाण्डित्यपरिपूर्णे चमत्कृतिप्रधाने महाकाव्यप्रवाहे यत् स्थानं किरातार्जुनीयरचयितु र्महाकवे र्भारवे र्यत् स्थानं शिशुपालवधनिर्मातु र्महाकवे र्माघस्य, यच्च स्थानं नैषधियचरितकर्तु र्महाकवेः श्रीहर्षस्य, तदेव स्थान कार्तवीर्योदयमहाकाव्यप्रणेतु र्महाकवेः सुकृतिदत्तपन्तस्यास्तीत्युक्तौ नास्ति मनागप्यत्युक्तिः । महाकविः सुकृति र्यत्र चित्रालंकृतिचित्रणे भारविमाघयोः सामीप्ये वर्तते तत्रैव वर्णनशैलीवस्त्वादिदृशा श्रीहर्षेण प्रभावितोऽस्ति । तेन श्रीहर्षकाव्यं निजादर्शत्वेन गृहीतमिति माहिष्मतीनागरिकवर्णनप्रवृत्तै स्तदीयै रेव शब्दैः स्पष्टीभवति :—

"श्रीहर्षकाव्यमिव सुन्दरसर्गबन्ध-
मानन्दयुक्तमनलङ्कृतमेव नेषत् ।
रम्योज्वलं कलिकथाकलितं यदीयं
जाने जनं जनितहीरभवप्रकाशम्[1] ॥

श्रीहर्षेण नैषधीयचरितमहाकाव्य इव सुकृतिनाऽपि कार्तवीर्योदयमहाकाव्ये प्रतिसर्गसमाप्तावुल्लिखितेनैकेनैवान्त्यपद्येन स्वीयः स्वल्पः परिचयःप्रस्तुतः—

"श्रीमत्कूर्मधराधरेन्द्रवसतिप्रख्यातपन्तान्वये
जातः श्रीभवदत्तपण्डितवरः श्रीभार्गवी तत्प्रिया ।

1- कार्तवीर्योदयमहाकाव्ये १ सर्गे ३२ श्लोकः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लेभाते सुकृतिं सुतं निजमतेः संशुद्धये तत्कृते
काव्येऽस्मिन् कृतवीर्यसूनुचरिते सर्गः ....[१]॥"

काव्यस्यान्तिमे सप्तदशसर्गेऽपि तेन स्वपरिचयोऽनतिविस्तरात् प्रस्तुतः। सुकृतिदत्तस्य पूर्वजाः कूर्माचलेऽन्यवसन्। तस्य प्रपितामहो रमापति र्नेपालभूभागमागमत्। स च पर्वतनरेन्द्रेण राजगुरुपदे नियुक्तः[२]। कार्तवीर्योदयमहाकाव्यानुसारमेतदीयो वंशवृक्षः—



कवेरग्रजस्य ज्वालादत्तस्य पञ्चमवंशधरेण कविवरेण श्रीभरतराजपन्तेन [३] प्रकाशितायां वंशावल्यामितोऽपि विस्तारः द्रष्टुं शक्यते—

१— कार्तवीर्योदये प्रतिसर्गसमाप्तौ

२— "कृष्णातटे प्रतिभटे .... पर्वतनरेन्द्रगुरुर्बभूव" तत्रैव १७/२

३— भरतराजपन्त (किताबको नाम भने पनि लेखकको नाम माने पनि) इत्याख्यस्य भरतराजपन्तकृतस्य परिशिष्टे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कविवरभरतराजपन्तप्रस्तुतेऽस्मिन् वंशक्रमे कार्तवीर्योदयमहाकाव्य - प्रस्तुतात् क्रमात् किञ्चिद् भिन्नत्वं दृश्यते । तथाहि -

१- भरतराजपन्तेन शिवरामो ज्येष्ठः प्रदर्शितः परन्तु कार्तवीर्योदये स्पष्टतया "ज्येष्ठस्तयोः समभवद्धरिरामसंज्ञः" × इति हरिरामस्य ज्येष्ठता प्रदर्शिता ।

२-भरतराजपन्तेन भवदत्तस्य पञ्चपुत्रा उल्लिखिताः परं कार्तवीर्योदये । 'लोक - द्वयेऽपि चतुरश्चतुरः पुमर्थान्' + इति 'चतुर्णामेवोल्लेखो दृश्यते ।

३- भरतराजपन्तेन भवदत्तस्य पुत्राणां क्रम इत्थं प्रदर्शित : -

१- मायादत्तः २ श्रीदत्तः ३ व्यासदत्तः ४ ज्वालादत्तः ५ सुकृतिदत्तः इति परं कार्तवीर्योदये मायादत्तो नास्ति क्रमश्चापरेषामित्थं वर्तते -

ज्येष्ठो न्यायनिदग्रणीः समभवच्छ्रीव्यासदत्ताभिधः
साहित्याम्वुधिपारगस्तदनुजः श्रीदत्तनामा कविः ।
ज्योतिःशास्त्रविदां वरस्तदनुजो ज्वालादिदत्तोगुणै -
रुत्पत्यापि जघन्यजोऽस्मि सुकृतिस्तेषामतिस्वल्पधीः ।। (१)

इति सुकृतेरग्रजादिविषये भरतराजापेक्षया सुकृतेरेव प्रामाण्यं सिद्धयतीत्यलं लघु-लेखेऽस्मिन् विस्तृतवस्तुविवेचनया ।

कवेः पूर्वजो रमापति र्यदा नेपालमागतस्तदा पृथ्वीनारायणेन नेपाल - स्यैकीकरणं प्रारब्धमेव नासीत् प्रारब्धेऽप्यभियाने तदा पर्यन्तं पर्वतराज्यं पृथगेवा. विद्यते ति "कृष्णातटे प्रतिभटेऽमरविष्टपस्यगत्यैष पर्वतनरेन्द्रगुरुर्बभूव" इत्यत : स्पष्टं भवति । पश्चाच्च नेपाले एकीकृते गुणज्ञैः साहवंश्यै राजभिरपि कवे : पूर्वजाः सम्मानिता बभूवुरिति तेनैव स्वपितुर्भवदत्तस्य परिचये स्पष्टीकृतम् -

नागाधीशवचोविचारविशदे गङ्गेश्वरोक्त्यम्बुधौ
मन्थाद्रिप्रतिमे च तत्र युगले स्वान्तव्यमालम्बिते (२)
साहित्यामृतकुण्डमीनसदृशे सांख्यै कसंख्यान्विते ।
नेपालक्षितिपालपूजितपदे का नेह विद्या स्थिता ।।

विदुषो भवदत्तस्य भार्गवी देव्याश्च पुत्रस्य सुकृतिदत्तपन्तस्य गृहमेकीकृत-नेपालस्य वागलुङ्मण्डले आसीदिति कर्णपरंपरातोऽवसीयते । अनेन कार्तवीर्यो -

---

१- कार्तवीर्योदये १७। १२   २-तत्रैव १७ । ८

× कार्तवीर्योदये १७।३   + कार्त १७।११

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दयमहाकाव्यं १९२८ वैक्रमाब्दस्य वैशाखशुक्लतृतीयायां×पूर्णतां नीतम् । अयं श्री ५ महाराजाधिराजस्य सुरेन्द्रविक्रमसाहस्य राज्यकाल आसीत् । अयमेव विंशतिशताब्द्याः पूर्वार्द्धः कविसमय इति यद्यपि निश्चितमेव तथापि पौर्वापर्यतिथेरन्वेषणन्त्ववशिष्टमेवास्ति ।

बाल्ये एवास्य पिता भवदत्तः स्वरयात् । त्रिष्वप्यग्रजेषु पृथग्भूतेषु वृद्धां जननीं सेवमानः सुकृतिस्तारिणींदेवीमुपास्य कवित्वमाप्तवान् । अयं शाक्त स्तान्त्रिकश्चासीत् । तान्त्रिकस्य तस्योपास्येष्टदेवता तारा तारिणी तारिका वाऽऽसीत् ।

"कृपापारावारोल्लसदमलकल्लोलसुभगा–
श्चतुर्वर्गस्तोमार्पणपणकृतप्रमोङ्कृतिकला: ।
हरब्रह्मादीनां प्रतिदिनमलं कांक्षिततरा:
कटाक्षा स्तारिण्या मम विदधतां विघ्नशमनम् ॥ (१) "

इति काव्यस्य प्रथमं मङ्गलाचरणमारभ्य तेन काव्ये पदे पदे तारिणी–चरणस्मरणं कृतं दृश्यते । तारा देवी तन्त्रशास्त्रेषु प्रसिद्धास्ति चीनाचारतन्त्रे तस्या उपासनाविधिरुपलभ्यते । तन्त्रशास्त्रेषु " काली तारा तथा वामा त्रिरूपे त्रिपुरे स्थिता,, (२) इति "या काली सा महादुर्गा या दुर्गा सैव तारिणी" (३) इति च दुर्गायाः काल्या स्तारायाश्चाभेदः प्रदर्शितोऽस्ति।

एकस्याः किम्बदन्त्या अनुसारं सुकृतिदत्तः शैशवे शीतला रोगेण ग्रस्तो मृतप्रायोऽभूत् । अस्य पितरौ भार्गवीभवदत्तौ बालं मृतं दृष्ट्वा भृशं रुरुदतुः । तदैवैका श्यामा युवतिस्तत्रागता । सा च शिशोः सुकृतेर्देहे कोद्रवान्नचुर्णं लेपयित्वा तस्मा आशिषं दत्वा सवधु पश्यत्सु तत्रैवान्तरधीयत । तत एव शिशौ पुनः प्रणानां सञ्चारोऽभूत् । सोऽचिरादेव स्वस्थो जातः । कथ्यते सा–सुकृतयेपुनर्जीवनदात्री भगवती तारैवासीत् । तत एव बालस्य सुकृतस्तारायां भक्तिरुदेत्॥ (४)

× "नागेन्द्रनेत्रनवभूमितवैक्रमाब्दे वैशाखमाससितपक्षतृतीयतिथ्याम् ।
श्रीकार्तवीर्यचरितोदितकाव्यमेतच्छ्रीतारिणीकरुणयापरिपूर्णमासीत्।।
"कार्त०१७।३५

१ कार्त. १।१ २ तन्त्रसंग्रहे षडाम्नायतन्त्रे चतुर्थपटले२४७

३ तत्रैव मायातन्त्रे ११पटले७

४ किम्वदन्तीयं कविवरभरतराजपन्तमुखाच्छ्रुतं लेखकेन ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भगवत्यास्तारायाः प्रसादेन तेन केवलं कार्तवीर्योदयमहाकाव्यमेव नालेखि'प्रत्युत विविधविषयेष्वप्यनेकाः कृतीः प्रदाय विक्रमस्य विंशशताब्द्यामपि संस्कृतसाहित्यस्य धारा तथैव प्रवाहिता यथा संस्कृतसाहित्यस्य चरमोत्कर्षकाले महाकविना श्रीहर्षेण द्वादशशताब्द्याम् ।

कार्तवीर्योदयमहाकाव्यानुसारं कार्तवीर्योदयं यावत् कविना सप्तग्रन्था लिखिता इति विज्ञायते १– सिद्धान्तवादः २– स्फोटवादः ३– रत्नावली ४– गङ्गाप्रसादः ५– मन्दारमाला ६– छन्दःप्रबन्धः ७– कार्तवीर्योदयमहाकाव्यञ्चेति । एष्वाद्यः सिद्धान्तवादो दर्शनसम्बन्धी स्फोटवादो व्याकरणसम्बन्धी रत्नावली – गङ्गाप्रसादमन्दारमालाः काव्यनाटकग्रन्थाश्छन्दःप्रबन्धश्च छन्दःशास्त्रसम्बन्धी ग्रन्थ इति तेषां नामभिरपुष्टमनुमातुं शक्यते । परं तेषां प्राप्तेः प्राक् यथार्थतया किमपि भणितुं न पार्यते ।

कार्तवीर्योदयम् – सुकृतेरुपलब्धा कृतिः कीर्तितम्भश्च कार्तवीर्योदयं महा – काव्यं यत्र सप्तदशसर्गेषु१७४०पद्यानी × सन्ति । अस्यापरं नाम 'क्षेमाङ्क' मित्यस्ति । "सर्गबन्धो महाकाव्यं तत्रैक नायकोः सुरः । सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः: । (७)......" इत्यादिमहाकाव्यलक्षणस्यानुगमस्तत्र साम-ग्र्येण विद्यते । कार्तवीर्योदयस्य कथावस्तु पौराणिकमस्ति । यद्धि मार्कण्डेयपु -

---

(१) अयमष्टमः समगमत् सिद्धान्तवादानुजे काव्ये श्रीकृतवीर्यसूनुचरिते सर्गः कृतेः सत्कृतौ ।"कार्त० ८। १०३

(२) तत्सुनोः सुकृतेः कृतौ कृतिमते सत्स्फोटवादानुजे काव्ये श्रीकार्तवीर्यसू-नुचरिते सर्गो दिशासंख्यकत्र कार्त०१०।११६

(३) नवमो गुणैरनवमः सर्गोऽगमत्पूर्णतां काव्येऽस्मिन् सुकृतेः कृतौ कृतिमते रत्नावली भ्रातरि ।" कार्त ९।१११

(४) तत्सूनोः सुकृतेः कृतौ पृथुमतेः श्रीकार्तवीर्योदये सर्गः काव्यवरे गतोह्यपदेशो गङ्गाप्रसादानुजे।" कार्त. ११।१२१

(५) सुकृतेस्त्रयोदशतया गण्योऽगमत्सर्गः काव्येऽस्मिन् कृतवीर्यसुनुचरिते मन्दारमालानुजे।। कार्त १३।५५

(६) काव्ये तत्तनयस्य चार्जुनगुणैर्भव्येऽतिनव्ये गतः सर्गः साधु चतुर्दशो विलसितच्छन्दःप्रबन्धानुजे ।" कार्त १४।१२४

(७) साहित्यदर्पणे षष्ठपरिच्छेदे

× प्रत्येकं सर्गस्योपान्त्यपद्ये क्षेमशकप्रयोगात् क्षेमाङ्कमिति नाम

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राणे संक्षेपतो देवीभागवतमहाभारतयोरपि विकीर्णमस्ति । महाकाव्यस्य माहिष्मतीपतिः कार्तवीर्योऽर्जुनो धीरोदात्तनायकः विदर्भराजकुमारी कनकप्रभा च नायिका विद्यते । शृङ्गारोऽङ्गीरसः शान्तवीरादयश्च यथास्थानमङ्गत्वेन लब्धपरिपाकाः सन्ति ।

कार्तवीर्योदयस्य कथा – माहिष्मतीशः कृतवीर्यो दिग्विजयानन्तरमनपत्यतया तपश्चरणार्थं मुनेर्दत्तस्य (दत्तात्रेयस्य) आश्रमं गच्छति । दत्तो राज्ञे पुत्रावाप्तेराशिषं दत्वा व्रतादिकमुपदिश्य माहिष्मतीं निवर्तयति । गच्छता कालेन राज्ञी गर्भं धत्ते । सा सुतं सूते । कृतवीर्यः सुतस्य नाम 'अर्जुन' इति करोति । विद्यावाप्त्यनन्तरं कृतवीर्यपुत्रोऽर्जुनस्तपश्चरति । कदाचिदर्जुनः स्वतपःप्रभावान्मद्भोग्यं स्वर्गशासनमधिकरिष्यतीति भिया देवराजोऽप्सरसां गणं मदनं च तत्तपस्यन्तरायमुपस्थापयितुं प्रेषयति । मदने तपो विघ्नयितुं विफले भीतः सुरेन्द्रो विधातुः शरणं गच्छति । ब्रह्मा तपसः फलत्वेनाष्टसिद्धीस्तत्र प्रेषयति । अर्जुनः सिद्धीरपि न स्वीकुरुते ।दत्तसहायो ब्रह्मा स्वयं तत्र गत्वा तं भुवं प्रतिपालयितुमनुरुणद्धि । गुरुसहितस्य ब्रह्मण आदेशं तिरस्कर्तुमशक्तोऽर्जुनस्ततो वरं गृहित्वा माहिष्मतीं निवर्तते । कृतवीर्यः पुत्रमर्जुनं राज्येऽभिषिच्य वानप्रस्थमवलम्बते । विदर्भादागतस्य दूतस्य मुखाद् भोजपुत्र्याः कनकप्रभायाः सौन्दर्यं विज्ञायार्जुनस्तत्रानुरज्यते । विदर्भजापि नारदोदितं कार्तवीर्यगुणं श्रुत्वा तद्वचनादवाजुनोपलब्धौ विश्वस्ता भृशमनुरक्ता भवति । स्वयम्बरे तम्वृणुते । ततश्च तौ राज्यपालनपूर्वकं विविधान् भोगान् भुञ्जानौ सप्तसु द्विपेषु सागरेषु च बिहरतः इति । कवेरेव शब्देषु संक्षिप्तं वस्तु :–

" आसीच्छ्रीकृतवीर्यभूपतिवरो माहिष्मतीपत्तने
लेभेसोऽर्जुनसंज्ञकं च तनयं दत्तोपदेशाद्धरिम् ।
तम्वव्रेऽथ विदर्भभूपतिसुता तौ दम्पती सप्तसु (१)
द्वीपेष्वब्धिषु चेच्छया व्यहरतां वृत्तान्तमेतच्छ्रत्रम्" ।।

काव्यस्य प्रथमे सर्गे माहिष्मत्या वर्णनं,द्वितीये राज्ञः कृतवीर्यस्य दत्ताश्रमस्य च तृतीये कृतवीर्यस्य दत्ताश्रमगमनस्य ततोनिवृतेश्च चतुर्थेऽर्जुनजन्मनः पञ्चमेऽर्जुनविद्याबाप्तेः षष्ठे चार्जुनस्य तपसः तत्तपोविघ्नाय समागतस्य कामस्य अत्रैव च वसन्तोदयस्य मनोरमं चित्रणं विद्यते । सप्तमेसर्गेऽर्जुनस्य गृहागमनवर्णने सचित्रं साङ्गोपाङ्गं शब्दालङ्काराणामुदाहरणमुखेन विवेचनं कृतमस्ति

(१) कार्त १७।३७

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अर्जुनराज्याभिषेककृतवीर्यवनगमनवर्णनात्मकेऽष्टमे सर्गे एकषष्ठर्थालंकाराणां सभेदोपभेदानांमुदाहरणानि गुणोदाहरणानि च प्रस्तुतानि । नवमे सर्गे विदर्भजायाः कनकप्रभायाः सौन्दर्यस्य मनोहारि वर्णनं विद्यते । दशमेऽर्जुनस्य विदर्भगमनमेकादशे प्रभातस्य सहृदयहृदयग्राहिणा वर्णनेनोपेतः स्वयम्वरोपक्रमः द्वादशे स्वयम्बरोपक्रमः त्रयोदशे च कार्तवीर्यवरणं चित्रितमस्ति । एवमेव चतुर्दशसर्गे कार्तवीर्यविवाहो रावणदर्पभङ्गश्च पन्चदशषोडशसर्गयोश्च प्रावृड्शरदादिवर्णनोपेतः कार्तवीर्यस्य द्वीपविहारो राज्यविलापश्च विस्तरात् वर्णितः । सप्तदशसर्गे कविना सप्तत्रिंशत्पद्यैरात्मकथोपन्यस्ता ।

कार्तवीर्योदयमहाकाव्ये कविना भावापेक्षया कलापक्षः समादृतः । वर्णनस्यौदात्यं प्रकृतिचित्रणस्य स्फुटता पात्राणां सजीवत्वं कवेर्वैशिष्टचमस्ति । अनुप्रासयमकयोश्छटा प्रायः काव्ये सर्वत्रैवावलोकितुं शक्यते । अस्य यमकानुप्रासललितपदावलीलालितं वसन्तवर्णनं चमत्कार्यस्ति –

कुसुमितासु मितासु नतासु नो विनमितासु फलैर्लतिकासु सः ।
रसविशेषविवित्सुरिवाभ्रमत् चलमना युवभृङ्गवरोऽद्भूतम् ॥
पिककुलाकुलचूतविपोतके भ्रमरगुञ्जितमञ्जुलकुञ्जके ।
ललितलोलितलोलविलोचनः ससुरभौ विभवौ ललनागणः ॥
भुवि वसन्तमसन्तमयोगिनां परिसमीक्ष्य वसन्तमदूरतः ।
परिहसन्तमपि प्रियमङ्गना हृदिलसन्तमगान्मदनोत्सवम् ॥
विषमवाणसितातपवारणे समुदिते रजनीजनिकारणे ।
विगतमानमदा प्रमदा रणे युयुधिरे नखदन्तविदारणे ॥
मधुरसौरभवन्मधुनाऽधुना मधुरसौ परसौख्यकरोऽभवत् ।
युवतयो वनयोग सुयोजिता रजनिजैर्जनिजैश्चनिजैः प्रियैः (१) ॥

कार्तवीर्यस्य तपस्यन्तरायमुपस्थापयितुं समागतानामप्सरसां विलासं प्रस्तुवता कविना किमपि सहृदयहृदयावर्जकः श्रृङ्गाराभासः प्रस्तुतः
सरभसं समुद- स्तभुजद्वया प्रपदपीडितभूमितलैकिका ।
द्रुमशिरःकुसुमावचयच्छलान्निबिडपीनकुचं समदर्शयत् ॥

(१) कार्त ६ । ६६ – ७०

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुचविलिप्तमदा प्रमदाऽलिनो वदनदंशनमेत्य सशीत्कृतम् ।
कुटिलचञ्चलनेत्रविलोकिता-ऽर्जुनमुखं प्रममर्द परास्तनम् ॥
मरुति वाति विलोमविधाविनी चलति चेलचये जघनात् घनात् ।
कनकशैलशिलासमशीलकं किमपितत्समदर्शयताऽपरा(१) ॥

येन स्वरेण व्यञ्जनेन वा पद्यमारब्धं तेनैव च तत्समापयता कविना क्रमशः समेषु स्वरेषु व्यञ्जनेषु च पद्यानि विलिख्य निज-पाण्डित्यं प्रदर्शितम् । दिङ्मात्रमत्र प्रस्तूयते–

ऋतं कथं स्याद् वचनं विधातुरनिच्छतो वा वरणं च कीदृक ।
सुमन्दभाग्यासु विरुद्धशीलमस्मासु दैवं किमहो विधातृ ॥ (२)

अत्राद्यन्तयो ऋकारः । एवमेव –

ऋकारवन्नेरयते च कार्यं गुणस्य वृद्धेरनिमित्तभूतः ।
प्रयातिसाधोरनुकारमात्रं स साधुतां साधुषु वा यथाकृः॥(३)

अत्र ऋकारः । प्रौढपाण्डित्यपूर्णा विविध शब्दवैचित्र्यचित्रिता भारव्यादिभिरनुसृता काव्यसरणी सुकृतिना पद्मबन्धखड्गबन्धगोमूत्रिकाद्वयक्षर-त्र्यक्षरपद्यानुलोमाप्रतिलोमादिचाकचक्यैः सनैपुण्यंनिर्वाहिता । निदर्शनार्थं दिङ्-मात्रमुदाह्रियते–दशदलपद्मबन्धः –

लब्धपालनविल्लक्षवालकापालनामलः ।
लङ्केशलङ्घनां लष्यन् स ललौक्ष्मां लसद्दलः ॥

प्रतिलोमार्द्धम् –

वायुरोधपरोधीरो रमारासकलो(ऽ)रिहा ।
हारिलो(ऽ)कसरा माररोधी रोपधरो युवा ॥ ५

अस्य पद्यस्यपूर्वार्द्धस्य विलोमपाठे उत्तरार्द्धमुत्तरार्द्धस्य च विलोमे पद्यस्य पूर्वार्द्धं सम्पद्यते । न केवलमयं शब्दशिल्पी, प्रत्युत अर्थयोजनाप्यस्य चमत्कारिणी । कनकप्रभायाः सौन्दर्यं प्रस्तुवता तेन प्रदर्शिता निजवर्णन चातुरी–

कमले विमलेऽपि नो सुधाऽमृतसिन्धौ न विधौ च सौरभम् ।
अदसीयमुखं जगत्सुखं द्वितयन्तद् भरतेऽति निर्भरम्
चपले विपुले विलोचने हरिणीगर्धविमोचने श्रिया ।
शिशुखञ्जनगर्वगञ्जने जयतोऽस्या लसदञ्जने पुनः ॥

---

(१) कार्तं. ६ क्रमशः ८१. ८७ ८८ (२) कार्तं. ७ | ७
(३) कार्तं. ७ | ८ (४) कार्तं ७ | ८२ (५) कार्तं. | ७ ६८

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कनकाचलजा शिला भवेत् सुरतक्ष्णा मसृणीकृता मुहुः
सुरभीपयसाऽभिषेचिता जनयेतां कुचयुग्ममुज्ज्वलम् ॥ (१)

वन्दिमुखात् विभातीयां प्रकृतिं चित्रयतोऽस्याप्रतिमा प्रतिभाऽवलोक्यते–

गगनतलसुतल्पे रात्रीचन्द्रौ यथेच्छं
गलदुडुसुममालं जातसर्वाङ्गसङ्गम् ।
रतिसुखमनुभूय क्षीणशुक्रेऽद्यकाले
द्रुतमुदसितहस्ते निष्प्रभौ संप्रयातः ॥ (२)

एवमेव सूर्योदयविषये विहिता कल्पना कस्य नाऽऽमोदावहा–
" उदयगिरिदरीतो निस्सरन् भानुसिंहस्तिमिरकरिसमूहं निर्दयं संपिपेष ।
तदनुगलदसृग्भीरज्यते पूर्वकाष्ठा न तु चरणविहीनस्यारूणस्योदयेन" ॥(३)

तथा च कनकप्रभास्वयम्वरावसरे समागतानां भूपतीनां संभावनायै प्रतिदिशं स्थापिताःजलपूर्णाः पल्लवमुखाः स्वर्णकलशाः कामिनीकुचरुचिं स्मारयन्तीति कीदृक् मनोहरि वर्णनम् ! –

मदनकेलिकलाकुलकामिनीकुचरुचिस्मृतिकारिभिरुन्नतैः ।
प्रतिदिशं जलसंभृत पल्लवोल्लसितहाटकसत्कलशैः श्रितम् ॥ ४

दार्शनिकसिद्धान्तानामुपमानत्वेन समुद्धरणं व्याकरणादिशास्त्राणां कवितया प्रस्तुतिः काव्यालंकाराणामुदाहरणमुखेन विवेचनं सर्वमपि कवेः सर्वशास्त्रविशारदतां व्यनक्ति । पदलालित्ये कविरयं सर्वानपि कवीन् अतिशेते । यद्यपि पदे पदे जातं पिष्टपेषणं काव्यान्तर्गडुभूतानां चित्राणां चित्रणमलङ्कारचमत्कृतौ विशेषो यत्न इत्याद्यनेकानिरसविरूद्धानि दूषणानि काव्ये दृग्गोचरीभवन्ति । काव्यस्य भावपक्षश्च कलायां निलीनो विद्यते, तथापि तथाविधचमत्कारप्रधानकाव्यमार्गे तेषां दुर्वारता भारव्यादिभिर्व्यवहारतोऽङ्गीकृतैवास्ति । काव्यमिदं मधुरकान्तपदालीभिरलंकारचमत्कारैः विविधशास्त्रसमावेशै रसयोजनया चातिवृहत्त्वयि वर्तते । काव्यस्य प्रौढताविषयेऽधिकारिनिर्देशं कुर्वता कविना स्वयमुक्तम् -

फणिपतिभणितिप्रविष्टचेता उदयनवाचिविशारदः स्मृतिज्ञः । (५)
भरतवचनभारतोक्तिविज्ञो, मम कृतिदर्शनमातनोतु विद्वान् ॥इति ।

---

(१) कार्त. ९ सर्ग क्रमशः ५५, ५९ ७५ (२) कार्त. ११।११
(३) तत्रैव १२ (४) तत्रैव ७२ (५) कार्त. १७। १७

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मन्वादिस्मृतिविषये संक्षिप्ता आलोचना

(१)

उपप्रा. छविलाल पोखरेल
पिण्डेश्वर विद्यापीठस्य
धरान–१४

अस्माकं स्मृतिनां मध्ये मनुस्मृतेः प्राथम्यं दृश्यते । पृथिव्यां यावन्तो धर्मा विद्यन्ते तेषामपि स्वस्वधर्मशास्त्राणि सन्ति,तेषां मध्येऽपि मनुस्मृतिरतिश्रेष्ठा अतिप्राचीना प्रगतिशीला व्यावहारिकी च दृश्यते । वाइबिलस्य नेपाल्यां कुराना-दीनां चहिन्द्यां प्रकाशनादन्वेषकै रस्माभिरपि स्वल्पः परिचयः प्राप्तुं शक्यते । अस्माकं धर्मशास्त्राणिस्मृतिनास्ता त्रिचत्वारिंशत्संख्यकानि प्रकाशितानि मनसुरलेरीयमोर. नरमकिन श्रेष्ठिना वितीर्णानि अस्माभिरपि प्राप्तानि । तेषु नारदस्मृति न दृश्यते । तस्याः स्मृतेरुल्लेखो युवराजकार्किणा विश्वपरिचय नेपाल पुस्तके ३६१ पृष्ठे सतिप्रथाप्रकरणे नारदस्मृतौ सतिप्रथा अस्ति इति लिखितम् सास्मृतिः केशरपुस्तकालये ३६९ संख्यायामस्ति इति लिखितम् दृष्ट्वा तदन्वेषणे नेवारलिप्यांमस्ति तत्र वि० संवत् १४०६ वत्सरे समसुद्दीनस्य नेपालदाहोऽपि विद्यते इति श्रुत्वा पुनः प्रयत्नो न कृतः अन्यत्रापि तत्स्मृतेर्नाम दृश्यते किन्तु न प्राप्ता ।

नारदस्मृतेरपि गणनया चतुश्चत्वारिंशत्संख्यकाः स्मृतयोः दृश्यन्ते । किन्तु याज्ञवल्क्यस्मृते रारम्भे एव मन्वादयो विंशतिरेव स्मृतयो लिखिताः । अत्र शंक्यते – याज्ञवल्क्येन ताः स्मृतयो न दृष्टाः,अथवा तदानीं नासन्, वा उपेक्षिताः? । अपि च चतुर्षु एव वेदेषु मनुस्मृतौ वाल्मीकिरामायणे च पत्युर्मृतौ पत्नीनाम् अग्निप्रवेशेनमरणा विधानस्य गन्धोऽपि न दृश्यते । अत एव दशरथस्य मरणेऽपि कौशल्यादयोदशरथपत्न्यो जीविता दृश्यन्ते । किन्तु व्यासस्मृतौ (२ । ५२) दक्षस्मृतौ (४ । १२) पराशरस्मृतौ (४।४३।३) अन्यासु स्मृतिषु पुराणेषु च प्रायेण सतिप्रथा दृश्यते । नेपालेतु वि. सं. १९७७ वर्षे विधानेनैव सतिप्रथा निषिद्धा

ऋग्वेदेतु – भार्यागृहद्वारि जनः स्मशाने, इत्यनुसारी व्यवहारो नासीत् । यतस्तत्र भार्यासहितानां स्त्रीणामपि स्मशानपर्यन्तं शवानुगमनं शवदाहानन्तरं सर्वासां स्त्रीणाम् " इमा नारीरविधवाः सपत्निः" (ऋक् १०।८१।७) इति मन्त्रानुसारेण परावर्तनमुच्यते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मृतकभार्याया विधवायास्तु " उदीर्ष्व नार्यभिजीवलोकंगतासुमेतमुपशेष एहि- [ऋक् १० । ८१ । ८] इतिमन्त्रेण उत्थाप्य स्वगृहं प्रप्रयन्तिस्म । मनुस्मृतौ तु विधवापत्नी आमरणं ब्रह्मचारिणीभूत्वातिष्ठतु , सन्तानाभावेऽपि ब्रह्मचारिणामिव स्वर्गप्राप्ति र्भवति , इति "सा मृतालभते स्वर्गं यथातै ब्रह्मचारिण: ( ) इतिउक्तम् । वस्तुतस्तुयथाभनवताबुद्धेन हिंसात्मक यज्ञानां जन्मनैवश्वे ष्ठरवदीनांव्यवहाराणं विरोधःकृतः तथा सतीप्रथाया बालविवाहस्य च विरोधो न विहितः । अशोकस्य शिलालेखादौ च अनुल्लेखात्पश्चादेव सतीप्रथाया बालविवाहस्य च आरम्भोजातः । नवीन व्यवस्थाया धार्मिक त्वदाढर्यार्थं च स्मृतिषु प्रक्षिप्ताः । पुराणानामृषीणां नाम्ना च नवीनाः स्मृतयाश्चनिर्मिता इति तर्क्यते ।

अन्यास्तु स्मृतिषु " दशवर्षभवेत् कन्या अत ऊर्ध्वं रजस्वला । प्राप्ते चैकादशेवर्षे कन्यां यो न प्रयच्छतिमासिमासिरजस्तस्याः पितापिबतिशोणितम् । विवाहयेदष्टवर्षामेवं धर्मो न हीयते । इति च दक्षस्मृतौ । मन्वौतु दशवर्षादनन्तरमेव रजसो ऽ दर्शनेऽपि रजस्वलापदवी न दत्ता । अपि च "

कामम्आमरणात्तिष्ठेद्गृहे कन्यर्तुमत्यपि ।
न चैवेनां प्रयच्छेत्तु गुणहीनाय कर्हिचित् । [मनु. अ.९श्लो.८९]

इति उल्लेखाद् बाल विवाहो नोक्तइतिप्रतीयते । किन्तु तत्रैव चतुर्विंशतिवयस्केन यूना अष्टवर्षा बालिका विवाह्या इति चोक्त्वा बाल विवाह उक्तइवभाति । यथा " त्रिंशद्वर्षोवहेत् कन्यां हृद्यांद्वादश वार्षिकीम् । त्र्यष्टवर्षोऽष्टवर्षां वा धर्मेसीदति सत्वरः [मनु.९ / ९४] वस्तुतस्तु यदा नानाकारणवशाद् बालविवाहस्य आवश्यकता जाता तदा मनुस्मृतेः सर्वमान्यात्वात्तत्र बालविवाहस्यएकः श्लोकः प्रक्षिप्त इतिशंकायांबलंलभ्यते ।

एवं पारस्करगृह्यसूत्रे हरिहरगदाधर भाष्ये,शूद्राणामदुष्टकर्मणामुपनयनमुक्तम्

गृह्यसूत्रे तु वर्णत्रयस्यैवोक्तम् । किन्तु आपस्तम्बे तद्वाक्यमधुना न लभ्यते किं जातम् ? वस्तुतस्तु यदा शूद्र विषयेनिषेधस्यप्राबल्यं जातं तदामूलग्रन्थाद्दूरीकृतं किन्तु भाष्यादौ अवशिष्टं स्पष्टं दृश्यते ।

एवमेव नवीन व्यवस्थाया आरम्भे सर्वमान्यत्वप्रदानायमनौ अन्येऽपि व्यवहाराः प्रक्षिप्ताः स्युरिति तर्क्यते । किन्तु के व्यवहारा प्रक्षिप्ताः के च मनुनैवोक्ता इतिनिर्णेतुं तु न शक्यते । अतश्च स्मृतौ एव प्रामाण्यसन्देहोऽपि आप-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तेत् । यदि च मनौ उक्तं सर्वमेव प्रमाणं मन्यते चेत् ततोऽप्यधिकमप्रामाण्यमापतेत्, यतः "शूद्रं तु कारयेद्दास्यं क्रीतमक्रीतमेवना'। दास्यायैव हि सृष्टोऽसौ स्वयमेव स्वयंभुवा न स्वामिना निसृष्टोऽपि शूद्रोदास्याद्विमुच्यते (मनु ८/११३ ८/११४) अपि च–शूद्रो हि धनमासाद्य ब्राह्मणा चैव वाधते (मनु. ११/१२०) अर्थात् ब्राह्मणैव द्विजानां दास्यार्थं शूद्राः सृष्टा अतः शूद्रजातेर्दास्यं न दूरी भवति इति उक्तम् / किन्तु अधुना दासप्रथा समाप्ता शूद्रा एव न अन्त्यजा अपि प्राध्यापका,डाक्टराः, सन्यासिनो विद्वांसोऽपि दृश्यन्ते / ब्रह्मणा सृष्टं शूद्राणां दास्यं कथमपिदूरयितुं न शक्यते इति मनु कथनं न सत्यं दृश्यते / वस्तुतस्तु मनोरेव नाम्नास्तौ द्वौ श्लोकौ प्रक्षिप्तौ इति प्रमाणीक्रियेते / यतः आर्द्धिकः कुल मित्रं च गोपालो दास नापितौ / एते शूद्रेषु भोज्यान्नायश्चात्मानं निवेदयेत् (मनु. ४/१५३) यदि शूद्रो दास एव स्यार्तहि कथं कुलमित्रं स्यात् / शूद्राणां भोज्यान्न ता एव न किन्तु प्राचीन समये ब्राह्मणादिभिः शूद्राः पाचकत्वेन महानसे स्थाप्यन्तेस्म, इत्यपि निर्णयसिन्धौशूद्रकमलाकरे च कलिवर्ज्यप्रकरणे "ब्राह्मणादिषु शूद्रस्य पचनादिक्रियापिचेत्य नेन कलौ ब्राह्मणादिभिः शूद्राः पाचका न स्थाप्या इत्यनेन ज्ञायते / भोज्यान्नताविषयेऽपि द्विजानां गोपशूद्रादौ भोज्यान्नत्वं कलौ नहि" इति धर्मसिन्धौ कलिवर्ज्य प्रकरणे निषिद्धम् /

द्विजानां समुद्र तरणेतु प्रायश्चित्तेनापि न शुद्धिः, इत्यपि समुद्रमध्ये नौ यातुः शोधितस्यापि संग्रहः इत्यनेन उक्तम्/मनौ तु न निषेधः समुद्रयात्रायाः अधुना मनौ उक्ता अनुक्ता अपि अनुचिता व्यवहारा मनुनाम्ना मनुस्मृतिं दूषयितुमेव स्यात् संस्कृतज्ञा अपि प्रकटीकुर्वन्ति / यथा ,, नेपाली आवाज इति पत्रिकायां[०४४।६।६]मितौ प्रकटित अंशः – शूद्रले वेद सुनेमा राङ पगालेर कानमा हालिदिनू, रीसले हेरेमा आंखा फोरि दिनू आदि कानुन त हुन् मनुस्मृतिका। आज त्यही चाहने नरहरि इत्यादिकः प्रायेण प्रक्षिप्तो लेखो मोदनाथ प्रश्रितस्य दृष्टः अन्यविद्वांसोऽपि मनोः प्रगतिशीलमुदारं व्यावहारिकं सर्वैः सर्वदा मननीयमंशमप्रकटीकृत्यैव पूर्वपरग्रन्थे असंबद्धमेव न विरुद्धमपि अनुदारपक्षं दर्शयित्वा मनुस्मृतिं निन्दन्ति । अतएव आधुनिक व्यवहारेऽपि विश्वमानवैरपि व्यवहार्तव्यो मननीयांशः स्वल्पएव प्रकटीक्रियते–

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यथा 'परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ
धर्मं चाप्यसुखोदर्कं लोक विक्रुष्टमेव च ।। (मनु-४।१७६)

धार्मिकोऽपि व्यवहारोपि यदि मनुष्याणां दुःखकारको हानिकरो दृश्यते चेत्त्यक्तव्य एव । अत एव स्मृतिषु उक्ताः सति प्रथा दासप्रथा बालविवाह कासाचिन्मनुष्य जातीनामस्पृश्यतादयो व्यवहारा दूरीकृताः अधुना ते व्यवहारा अधर्मे गण्यन्ते ।

पृथिव्यां केनापि धर्मग्रन्थेन स्वयं कथितो धार्मिकोव्यवहारः स्वयमेव क्षणिक रश्चेत्त्यक्तव्य इति नोच्यते ।

एवमेव अस्माकं शास्त्रेषु ज्ञाताज्ञातानि पापानि दूरीकृत्य स्वशुद्धचर्थं महानि पुरश्चरणादीनि तुलादानं धान्यपर्वतदोनादीनि चान्द्रायणादि नानाविधानि व्रतानि स्नानसन्ध्याप्राणायामध्यानजपपाठादीनि उक्तानि । किन्तु यदि अर्थशुद्धिनविद्यते भ्रष्टाचारं करोति चेत् दम्भ एव भवति इत्यपि "सर्वेषामेवशौचानामर्थशौचं परं स्मृतम् । योऽर्थेशुचिर्हि सशुचि र्न मृद्वारिशुचिः शुचिः[मनु ४।१०६]यावत्कालपर्यन्तमधिकारीवर्गेषु आर्थिकभ्रष्टाचारतिष्ठेत्तावत्कालपर्यन्तं देशविकास उन्नतिः खपुष्पमिव दृश्यते । अर्थशौचमुद्योगीकरणंच आर्थिकोन्नतेर्देशविकासस्य च मूलम् ।

वानप्रस्थानमाकार वर्णने ग्रीष्मे पञ्चतपास्तु स्यात्वर्षास्वभ्रावकाशिकः । आर्द्र वासास्तु हेमन्ते क्रमशो वर्धयस्तपः [मनु. ६ । २३] भागवते एकादशस्कन्धेः आकण्ठमग्नः शिशिरे " इत्येनेन नद्यादौजले आकण्ठं तिष्ठेदित्युक्तम् । एतादृशे न आचारेण कियत्कालं जीवेत? शीघ्रमेवस्वर्गंगच्छेत् । किन्तुमनुस्मृते र्व्यावहारिकशास्त्रत्वात्पूर्वं तथाउक्त्वा उपसंहारे " संन्यस्य सर्वकर्माणि कर्मदोषानपानुदन् । नियतो वेदमभ्यस्य पुत्रैश्वर्येसुखं वसेत् [६। ९५] इति उक्तमेव मनुनास्मृते रूपसंहारे च " एवं यः सर्व भूतेषु पश्यत्यात्मानमात्मना । स सर्वसमतामेत्य ब्रह्माभ्येति परंपदम् [१२ । २५] इत्यनेन सर्वात्मभावनया सर्वेषां समानताप्रतिपादिता । तथा करणेनैव ब्रह्मप्राप्तिरपि भवतीत्युक्तम

एवमेम (०४४ ।६।८) मितौपत्रिकामेव ' मोदनाथप्रश्रितस्य लेखएव सारा हिन्दूले भजिने रामको राज्यमा शूद्रले पनि मर्यादापूर्ण जीवन निम्ति प्रयास गर्दा राम आफैले शूद्र नेता शम्बूकको टाउको काटेको ,,इत्यादि चदृष्टम् | वस्तुतस्तु साशम्भूककथा--न्यदाशूद्रैर्द्विजानांसेवा एवकार्य, पठनपाठनतपसुचनाधिकारः इति व्यवस्था विहिता तदा सर्वासुस्मृतिषु रामायणादौ च नानाविधानिषेधाः कथाश्चप्रक्षिप्ताः | यतः कास्मश्चित्कोणेशूद्रेण

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तपस्तप्तम्' तेनैवकारणेन, ब्राह्मणपुत्रो मृतः । रामेण, तस्य बधादेव, ब्राह्मण-पुत्रोजीवितः । इति, कथा श्वेतराजः कथा, ब्राह्मणे न कुकुरस्य ताडनात् कुकुरो रामस्य समक्षे न्यायं याचितवान् रामेण च न्यायो दत्तः । इत्यादिकाः कथाः पूर्वकालादारभ्य अधुना पर्यन्तं वास्तविकोपदेशार्थं कथ्यन्ते, तत्रसत्यांशः परिशोधितव्यः । श्वेतराजकथा च महात्मनावाल्मीकिना रामंप्रति उक्ता समीचीना उपदेशप्रदैवदृश्यते । रामंप्रति आर्थिक भ्रष्टाचारो न, विशेषः, त्वयालोभोनकर्तव्य, इतिकथनापेक्षया श्वेतराजकथा कथनमतिसमीचीनं प्रतीयते । शम्बूकथा उत्तररामचरिते ऽप्यस्ति अतो भवभूतेः पूर्वंकल्पिता इति न कथयितुं शक्यते । तदानीमत्ये ऽपि ब्राह्मणक्षत्रिय पुत्राजाताः स्युस्ते ऽपि तस्यतप-साभूताः स्युरेकएव राजद्वारि मृतोत इत्यपि चिन्तनीयम् ।

उक्त विषये चर्चा ।

यदि अस्माभिः संस्कृतज्ञैर्विद्वद्भिरपिस्मृति प्रामाण्ये शंकाक्रियते चेत्कथम् अस्माकं व्यवहारा प्रचलेयुः । अस्माकं व्रतबन्धविवाहान्त्येष्ट्यादिकर्माणि, आशौचादीनां निर्णयः, विवाहे सगोत्रसंबन्धसामीप्य निषेधाः, वर्षदिनपर्यन्तं शिवरात्र्यादि नानाविधपर्वमान्यता, नित्यनैमित्तिक काम्यकर्माणि च स्मृतिपुराणादिभिः धर्म-सिन्धवादिभिर्निबन्धैश्च संचालितानि दृश्यन्ते, यदि तेषुग्रन्थेषु अप्रामाण्यमस्मा-भिरेवक्रियेत, तर्हि अस्माकं तानि कर्माणि आधाररहितानि स्युरितिशंकाउद्वेति ।

यदि स्मृत्युक्तं सर्वं प्रमाणं मन्यते चेदथः हास्य वेदमुपशृण्वतस्त्र पुज-तुभ्यां श्रोत्रप्रतिपूरणमुच्चारणे जिह्वाच्छेदोधारणे हृदयभेदः (गौतस्मृति १२/१) इति वाक्यानि जगद्गुरुणा शंकरेणापि ब्रह्मसूत्रस्य अपशूद्राधिकरणे प्रमाणत्वेन यथावदुद्धृत्य संमानितानि । अपि च घृतदुग्धादिभिः पक्वमन्नं शूद्रात्कलौ त्यजेत "समुद्रमध्ये नौयातुः शोधितस्यापि संग्रहः" न विधेयः इत्यादीनि अपि प्रमा-णि अस्माभिः स्वीकृत्य जनतायां प्रकटयन्ते चेत्, चत्वारो मूर्खपण्डिताः, इति श्लोके बहवो मूर्खपण्डिताः इति कथयितुं योग्याभवेम । इति उभयतः पाशरज्जू रस्माकं गले दृश्यते । अतश्च धर्मं चाप्यसुखोदर्कं लोकविक्रुष्टमेव च परित्यजेत् इति (मनु ४/१७६) वाक्यमेवानुसरणीयं दृश्यते ।

एवं च सगोत्रसंबन्ध सामीप्य विवाहनिषेधाः व्रतबन्धविवाहान्त्येष्ट्यादि कर्माणि पर्वोत्सवतीर्थादीनि नित्यनैमित्तिक काम्यकर्माणि शास्त्रानुसारेणैव यथा शक्ति सार्वजनिकानि हिन्दूसमाजे भवन्तु इति विचार्य संचालनीयानिइत्येवा वशिष्टं दृश्यते । कर्माणि वित्तशाठ्यं वर्जयित्वा भवन्तु इत्यपि स्मर्तव्यम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्यथा पौहित्यमपि समाप्तंस्यात् इत्यपि स्मरणीयम् ।
सर्वाः स्मृतयोऽपि द्रष्टव्याः सारोग्राह्यः सुधारवादिभिर्भवितव्यम् ।भृत्यानामुपरोधेन यः करोत्यौर्ध्वदेहिकम् । तद्भवत्यसुखोदर्कं जीवतश्चमृतस्य च । (मनु - ११।१०) शक्तःपरजने दाता स्वजनेदुःखजीविनि । मध्वापातो विषास्वादः स धर्मप्रतिरूपकः (मनु. ११।९) इतिचविचार्य सर्वत्रसुधार दृष्टिर्ग्राह्या । इति ।। वेदोऽखिलो धर्ममूलम् (मनु. २।६) अतश्च वेदमन्त्रार्थो ऽपिद्रष्टव्यः । यथा भोमनुष्याः ! मित्रस्य मा चक्षुषा सर्वाणी भूतानि समिक्षान्तम् (यजु. ३६ - । १८) सर्वाणी भूतानिमैत्रीदृष्टचा एव द्रष्टव्यानि न तु उदासीन दृष्टचा वा शत्रुदृष्टचा इत्यर्थः। एव चेद् अन्येषु नानाविधेषु खाद्यवस्तुषु सत्सुकथं मांसभक्षणां क्रियते ? इति शोच्यमारुचं नो धेहि ब्राह्मणेषु रुचं राजसु नस्कृधि। रुचं विश्येषु शूद्रेषु मपि धेहिरुचारुचम् (यजु. १८।४८) अनेन मन्त्रेण शूद्रेषु अपि तेजस्विता प्रार्थ्यते । यथेमां वाचं कल्याणीमावदानि जनेभ्यः। ब्रह्म राजन्याभ्यां शूद्राय चार्यायस्वाय चारणायच (यजु. २६।२) अनेनमन्त्रेण शूद्रेणसहापि कल्याण्या वाचा व्यवहृयताम् । इत्युक्तम् । ईशा वास्यमिदं सर्वंयत्किंच जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् (यजु. ४०।२) कुर्वन्नेवेह कर्माणी जिजीविषेच्छतं समा. (यजु. ४०।३) यस्तु सर्वाणीभूतान्यात्मन्येवानुपश्यति । सर्वभूतेषु चात्मानंततो न विजुगुप्सते (यजु. ४०।६) एवं सर्वात्मभावनावान्पुरुषः कमपि जीवं प्रति नीचभावनां न करोति । अत एव इत्यादि मन्त्रानुकूला व्यवस्था नेपालस्थापिता ।। सप्तमर्यादाः कवयस्ततक्षुस्तासामेकामिदभ्यंहुरोगात् (ऋक्. १०।५।६) प्राचीनामुनयः सप्तमर्यादा अनुल्लंघनीयाः स्थापितवन्तः । तासां मध्ये एकस्या एवोल्लङ्घने (अभ्यंहुदः) पापीयान् भवति, इत्युक्तम् । सप्तमर्यादाश्च मद्यपानम् । अक्षदेवनम् (जुवा) व्यभिचारः; मृगया, क्रोधेनपरुषवाक्यप्रयोगः, ताडनादि आर्थिक भ्रष्टाचारश्चेति । एतानि मुख्यानि पापानि गणितानि । अस्माभिः पशुर्भिभिन्नता बुध्या एव परिचीयते । तां बुद्धि कियत्कालपर्यन्तं मद्यपानं विकृति करोति, मद्यपानंसर्वत्र बर्धमानं दृश्यते । तस्य विरोधः सर्वैः कर्तव्यः। अन्यत्र नसः स्वो दक्षो वरुण ध्रुतिः सा सुरा मन्यु र्विभदिको अचित्तिः ऋक्. (७।८६।६) इति मन्त्रेणापि सप्तसु दुर्गुणेषु सुराया एव प्राथम्येमुक्तस् ९।१० कक्षाया इतिहासे वैदिकासुरां पिबन्तिस्म इति छात्राः पाठ्यन्ते । विद्वद्भि विचार्यम्

एवमेव शास्त्रीयविधिनिषधविषयेऽपि संस्कृतज्ञै विद्वद्भिः स्वबुध्या विचार्यैव वक्तव्यं न तु संस्कृत श्लोक दर्शनेनैव । यथा ग्रहण समये मूत्रपुरीषोत्सर्गो न

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विधेय इत्युक्तम् किन्तु घण्टात्रयपर्यन्तमपि कदाचिद्ग्रहण भवति तत्रवत्समयपर्यन्तं तद्वेगं न सर्वैं रोद्धु शक्यते ।

अपिच पितृतर्पणे खड्गपात्रस्य,व्रतवन्धेमृगचर्मणः,पूजायां चामरस्य च विधानं दृश्यते,अधुना वन्य जन्तु संरक्षणेन खड्गपात्रस्यमृगचर्मण उपयोग आधिक्ये क्रियते चेद् वन्यजन्तु संरक्षणे भ्रष्टाचार आपतेत् । चामरस्यापि सर्वत्र उपयोगे चमरी पालकाश्चमरीः पुच्छरहिताः कुर्युः ।

अत एतादृशेषु विषयेषु अत्याग्रहस्त्यक्तव्यः । इति भाति । अस्माभिः प्राचीनगौरव-रक्षणे प्रयत्नो विधेयः । यदि प्राचीनमान्यता विरोधि नवसत्यं ज्ञायेत चेत्तदा नवसत्यमेव ग्राह्यम् न तु नवसत्यात् परावर्तनम । यथा चन्द्रात्सूर्यो अधोवर्तते इत्यादिकं चन्द्रविषयकं ज्ञानं चन्द्रे मनुष्यस्य पादन्यासेन चन्द्रविषयकेण नवसत्येन दूरीकृतम् ।

इत्येतत्रदृशानि उदाहरणानि विचारणीयानि ।

अपि च प्रायेणपुराणेषु अधुना कलियुगंवर्तते। अस्माभिर्देशोन्नतिविषये धार्मिक नैतिकविषयेत् किमपि कर्तुं नशक्यते ।

अस्माकं कर्तव्यं हरिभजनमेव। भगवानेव कल्किनाम्ना अवतरिष्यति सर्वान्म्लेच्छान्समाप्य सत्ययुगं प्रवर्तयिष्यति इति देवीभागवतेस्कन्धे ९अध्याये ८ अन्येषु पुराणेषु च प्रायेण दृश्यते । किन्तु अस्माके पञ्चाङ्गेषु धर्मसिन्धवादौ च श्रावण शुक्लषष्ठ्या कल्कि जयन्ति लिखिता दृश्यते। कल्किर्जात इव भाति म्लेच्छा वर्धमाना एव दृश्यन्ते । कविशिरोमणिना श्रीलेखनाथेन च प्रायेण तदनुसारी एव सत्यकलिसंवादेलिखितः। मनुस्मृतौ महाभारते उ.प.अ.१३१ च कलियुगस्य सत्ययुगस्य च कर्तारो मनुष्या एव इत्युक्तम् । राजा वा नेता एव युगप्रवर्तको भवति। राजाहियुगमुच्यते ।कलिःप्रसुप्तो भवति सजाग्रद्द्वापरंयुगम् । कर्मस्वभ्युद्यतस्त्रेता विचरस्तु कृतम् युगम् (मनु९।३०२) इत्युक्तं यथार्थमेव दृश्यते

ज्योतिष शास्त्रेषु कलियुग वर्णनमन्यविधमेव मन्तव्यम् । वेदेषु कलियुगस्ययुग चर्चा न दृश्यते। ऋक्वेदे [ऋक्१०।३१एव कलिनामकस्य बुद्धस्य ब्राह्मणस्य अश्विनिकुमाराभ्यां वृद्धतां दूरीकृत्य युवाविहितं इतिउक्तम् । ऐतरेय ब्राह्मणेषु मनुस्मृतौ महाभारते इव मनुष्यैर्वा प्रजा नेत्रा राजावा कलियुगं सत्ययुगं च निर्मीयते इत्युक्तम् ।

[महाभारते शान्तिपर्वणि अ.७०–उद्योगपर्वणि अ.१३१]चतुर्षु युगेषु मनुष्याणां कर्तव्यांकर्तव्यविषये सुखदुःखविषये च निराशात्मिका चिन्ताआसीत्, महाभारतस्य मनुस्मृते रैतरेवब्राह्मणस्यचाध्यायर्नैसा चिन्ता दुरी भूता।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मुद्रकः– संस्कृतछापाखाना बेलझुन्डी दाङ

Jayatu Sanskritam, Kathmandu, Nepal